ऽर्मी नाम पर्यणाय विस्तीर्णं पंथानं कृतवान् तं पंथानं अनुगच्छामीति वाक्यार्थः अ
त्र स्थूयीयेति षष्ठ्यर्थे चतुर्थी पंथामिति पंथानमित्यत्र नकारलोपश्छांदसः अन्वेत
वै इति इणुगतावित्यस्मादनुपूर्वात्कर्मणि तिधातव इति प्रति पूर्वाद्धातेः रूपं
अक इति करोतेर्लुङ् प्रथमैकवचने सिप्प्रत्ययः ॥ बकुलं छंदसीति बहुवच
नादिकृनलवति धातोर्गुणे रपरत्वं हलं तादिना चिलकिलोपः रेफस्याविसर्गः
हृदयाविध इति हृदयमाविध्यतीति क्विप् नमो वरुणायेति वरुणाय नमः अस्तु
ऊतः वरुणस्य जलरूपपाशाक्रमेण याअघीतिर्ज्ञायते सा वरुणनमस्कारे
णापनीयते तेन वरुणनमस्कारपूर्वकं जलावतरणं क्रियत इति ॐ शतेन त्रा
तं वरुणं ये सहस्रं यज्ञियापाशा वितता महांतस्ते निर्नो अद्य सवितोत विष्णुर्विश्वे
मुंचंतु मरुतः स्वर्काः ह वरुण मेत वयेयज्ञियायज्ञसंबंधिनः शतं पाशाः सहस्रं वा

शिवः
३

इहैव लोके तिष्ठन्स ब्रह्मलोकाय कल्पते ॥ व्यासः ॥ समुत्थितं श्लोकमपि श्रुताधी
तैर्विशिष्यते ॥ चतुर्णामपि वेदानां केवलाध्ययनाद्द्विजाः ॥ अनूचाना ग्रंथिनः श्रे
ष्ठाः ग्रंथिभ्यो धारिणः श्रेष्ठाः ॥ धारिभ्यश्चार्थतत्त्वज्ञास्तेभ्योऽप्यध्यात्मचिंतकाः ॥ ॥
अथ कातीयस्नानमंत्रव्याख्या ॥ उरुं हि राजा वरुणश्चकार सूर्याय पंथामन्वे
तवा उ [illegible] ॥ १ ॥ हि यस्माज्जलस्य राजा वरुणः सूर्याय सूर्यस्य पंथां पंथानं
उरुं विस्तीर्णं चकार कृतवान् तस्मात्तं पंथानं अदं अन्वेतवै अनुगच्छामीत्य
र्थः ॥ पक्षांतरे स एव वरुणः अपदे आकाशे सूर्यस्य पादानां रश्मीनां प्रतिधातवे पाद: ४
अर्पणाय अकः कृतवान् अविधुः तस्य पदे अपदे अपवक्ता उत अपि च स एव व
रुणः हृदयाविधश्चित् हृदयाविधः पिशुनस्यापि अपवक्ता नियामकः चित्
अप्यर्थे तथा च जलस्य राजा पिशुनस्यापि नियामको वरुणः ॥ आकाशे सूर्यस्य

अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधः ४

उ ×

तमेवं पंथानं ४

वितानाः विस्तीर्णाः पाशाः किंत्वतां महांतः उत्कृष्टा ते त्रिः तेभ्यः अघनः अस्मै
वितामुंचंतु मोचयंतु उत्तममुत्तये विलुस्यमोचयंतु विश्वे विश्ववर्त्तिनः मरुतश्चतु
सुयथास्यात् एव अर्कोस्य मोचयंतु सुमित्रियानः आपः ओषधयस्संतु दुर्मित्र
यास्तस्मै संतु योस्मान्द्वेष्टि यंचवयंद्विष्मः आपओषधयश्चनः अस्माकंसुमित्रि
याः साधु मित्रत्वेनावस्थिताः संतु दुर्मित्रियाइतिताएवतस्मै दुर्मित्रियाः दुष्टमित्र
त्वेनावस्थिताः संतु तस्मै कस्मै यो अस्मान्द्वेष्टि अर्थात् शत्रुः यंचवयंद्विष्मः अ
र्थात् शत्रुमेव इदंविष्णुर्विचक्रमे त्रेधानिदधेपदं समूढमस्यपांसुरे इदं जगद्वि
ष्णुः यद्वा विष्णुर्व्यापको विष्णुर्व्यापकः किंचसत्रेधापदं निदधे भूम्यंतरिक्षस्वर्लो
केषु अग्निवायुसूर्यरूपेण त्रिधापदं निहितवानित्यर्थः किंच अस्यैव विष्णोः अ
न्यत्पदांतरं विज्ञानमयानंदमयाद्वैतमक्षरमित्येवं लक्षणं समूढं अंतर्हितं। अ
न्तद्देहेंद्रियमनोजीवभावेनद्विकालेरुतिद्विषुः २

विचक्रमे क्रा
क्रांतवान् वि
भुत्वात्॥ स
र्वभूतानि को

कृ

विज्ञातमित्तियावत् अर्थो दत्तात्मत्तिः पांसुरे इति लुप्तोपमये तत् तेन पांसुलमे
व रत्नयोरेकत्वस्मरणात् तथा च यथा पांसुले पांसुमये प्रदेशे निहितं अन्यत् द्र
व्यांतरं समुद्दंदर्शनायोग्यं भवनीति तात्पर्य्यं तदुक्तं तद्विष्णोः परमं सदा पश्यंति
तिसूरयः दिवीव चक्षुरा ततमिति अपो अस्मान्मातरः शुंधयंतु घृतेन नो घृत
प्वः पुनंतु विश्वं हिरिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरापूत एमि आपत्रुच्यं ते।
अयाएता आपः मातरः जगतो निर्मात्र्यः ता अस्मान् शुंधयंतु शोधयंतु किंच
नो अस्मान् घृतेन पुनंतु यज्ञयोग्यं कुर्वंतु किं भूताः आपः घृतप्वः घृतेन प्लावयंतीति
घृतप्वः घृतं अपां परमं तेजः पवित्रं च तथा च श्रुतिः तदेषु घृतं घृतेन पुनंतीति इति
स्रुवंति धारा घृतप्रवाः इति मेधानीति गो... मः स्तुतिपूर्वं यज्ञाक्रियत इति ...
विश्वमिति क्रियास्मात् विश्वं सर्वं रिप्रं पापं देवी देव्यः नव्यः प्रवहंति मार्जयंति रेयो

व

८८

शिवः ४

नप.।रथा चाग्नेमा मुते सनुत्र पतक्रत सनसा द्रावेनपूर समसनूतदेमितहृ
उपदेनपेव .२

रिष्वमिति पापनाम नीइत्युवटः यस्मात्स्वभावत एवसर्वे रिष्वंपापंयत्कर्षेण
नाशयंतिसवस्यः तस्मात्इदमपिपापंनाशयेत्यर्थः उदोदित्यइति उदित्यनेन
वदितेनएमीमसंबामिं मानस्तोकइति आख्यानंसूतरूपियव्याख्यानेद्रष्टव्यं इमं
मेवरुणश्रुधीहवमद्या चमृडयत्वामवस्युराचके हेवरुण अद्यमेमदीयंआका
नंश्रुधीः शृणु अस्मांश्च आमृडय आसुखय मृडसुखेन कालांतरंनापेक्षणीय
मित्यर्थः किंकारणं यतस्त्वामहमाचके कामये आचकइति कांतिकर्म क
यंस्तंकामये अवस्युः आत्मनोधनं रक्षणंवाइच्छन् ग अस्मरक्षणंधनंचेतत्वा
यामीसोंतदितिय दर्थोद्वयः अयेतदः अवणात् ऋत्विग्वदति अहंब्राह्मणे
नयीलक्षणेनवंदमानः स्तुवन्सन् यत्वयोजनार्थंत्वांयामि उपसर्पामित
देवायंयजमानः आस्तेशोहविर्भिरुपस्थितेः अतः हेवरुण अहेडमानः अ

तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेहबोध्यु
रुशंसमानआयुःप्रमोषीः ।। १।।३

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः। यजिष्ठो वह्नितमः शोशु-
चानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत्॥४॥

ऋध्नन् इह कर्मणि वर्तमानः नः अस्माकं प्रयोजनं यज्ञसमाप्तिलक्षणं बोधि बुध्य-
स्व हे उरुशंस बहुभिः स्तव्य नः आयुः मा प्र मोषीः मा खंडय त्वं नो इत्यादि हे अग्ने
त्वं नः अस्मान् प्रति वरुणस्य देवस्य हेडः क्रोधं अव यासिसीष्ठाः अवगमय दूरीकु-
रु त्वं किं भूतः विद्वान् जानानः क्रोधमिति शेषः अवयासिसीष्ठा इति यासु
प्रयत्ने इत्यस्य एणं तस्मात् अव पूर्वस्य लिङि रूपं यस्मात् त्वं यजिष्ठः यष्टृतमः वह्नि-
तमः वोढृतमः अथो तद् हविषां शोशुचानः दीप्यमानश्च भवसि तस्मात् प्रार्थ-
अस्मत् ये अस्मत्तः विश्वा विश्वानि सर्वाणि द्वेषांसि दौर्भाग्यानि प्र मुमुग्धि प्रमोचय स त्वं मुः
नो इत्यादि हे अग्ने स त्वं एवं प्रार्थ्यमानः अस्माकं अवमः अवतृतमः पालयितृ- शिवः
तमः भव ऊती ऊत्या तर्पणेन गत्या वा नेदिष्ठः निकटतमश्च भव कस्मिन् समये ५
अस्याः उषसः व्युष्टौ विच्छेदावच्छिन्ने काले अस्मिन्नेवाह्नीत्यभिप्रायः तत्रैव

यद्वा अवगमनो स्माकं वरुणं यजमाना: रममाणाः सन् यद्वा रादाने हविः ददानः
ततोवा हि नक्षय अर्थात् पुरोडाशं किंभूत पुरोडाशं मृडीकं सुखकरं ततोस्मा
कं सुदवः स्वाकानेंएधि स्व मापोमोषधीरित्यादि हे वरुण नैषधीर्माहिंसी: अप
अमाहिंसी: किंच हे राजन् वरुण ततः धाम्नः पाशसमन्वितान् स्थानात् नोस्मान् धाम्न ४
प मुंच मोचय नो विभ्रमः इसतिप्राय: यदूक्तमिति किंच हे वरुण ततस्तस्मादेनसः
नोस्मान् मुंच मोचय अर्थात् गोवधात् ये तोगावः अघ्न्या अहिंस्या इति आक्तः
अर्थात् वेदस्मृतिलोकवाक्यानि वयंच इति अनेन प्रकारेण ताः शपामहे हिंसा
मः तथाच अहिंस्याः पूजनीयाश्च हिंसामेति तद्धिंसाजनितं पापं नाशयेति वाक्या
म र्थः। उदुत्तममिति। उदित्ययमुपसर्गः उत् श्रथायेत्यत्र संबध्यते वरुण अस्मत् अस्म
त्तः उत्तमं ऊर्ध्वस्थितं तावत् पाशं उच्छ्रथाय पीड्य सोर्द्धं नय अधमं च पाशं अवा

चीनं अवश्रथय मध्यमं च पाशं विश्रथय अथैवं कृते सति हे आदित्य अदितेः पु
त्र तव व्रते कर्मणि वर्तमानाः अनागसो ऽनपराधाः वयं अदितये अदीनतायै स्या
वेम म मे मुंचंतु माशपथ्यादित्यादि पाशात् मुंचंतु अथो अनंतरं उत अपि च यमस्य य
म संबंधिनः पड्बीशात् बंधनात् मुंचंतु संदानमर्वंतं पड्बीशमिति दृश्यतऽसु चेदः
किंच सर्वस्मात् देवसंबंधिनः किल्बिषात् पापात् मुंचंतु अवत्वेत्यादि हे अग्ने वरु
ण यज्ञायतस्त्वं मित्र उग्रः नीचैः कृणोसि नीचैः करोसि नीचैश्चरणोसि तं वयमप्ये
वे देवकृतमेनः अवयासिषं अद्य अपनीतवान् देवविशेषकृतं देवकृतं के सह शिवः
देवैः सह किंच मर्त्यैः मनुष्यैः अर्थात् ऋत्विग्भिः सह मर्त्यकृतं पापं अवयासिषम ६
त्म विषये कृतं मर्त्यकृतं अतस्त्वं हे अग्ने वनस्पते देव रक्षः पाहि देवसंबंधिनः रिषः
वधात् पाहि रक्ष रिषति हिंसार्थः क्विबंतः कथंभूतात् वधात् उरुराव्णः रादाने।

मोघ

बद्धकालोपलोगम्लानदातुः अर्थात्संसारलक्षणाबाधात् यथा रुशादे रुवंति
प्राणि स्मिन्संसारे इति उरुणा वा ... तस्मात् उरुरा वा संसारादित्यर्थः इदमापः
स्यादि हे आपः इदं पशुसंबंधि पापं प्रवहत अपनयत किंच अवद्यं अवदनीयं अ
नित्याशापादितं प्रवहत यच्च मलं शरीरसंलग्नं तत् प्रवहत यच्च अनृतं मिथ्येव
अभिदुद्रोह द्रुग्धवानस्मि अर्थात्परिचरणीयं सेवनीयं यच्च अनारुणं अन
पराधिनं अभिशेपे अभिशप्तिवानस्मि अपराधीहिविनेति अतो नारुणाद्देना
पराध्युच्यते यथा अभित्युनातिछिनत्तिमर्माणि यद्दुरितं सत्र्य नलीरुणं त
स्मादेनसः आपः पृथक्कुर्वंतु पवमानश्च सोमो वायुर्वा मां चतु मोचयतु हविष्म
तीरिमा इत्यादि इमा आपः हविष्मतीः हविषा संयुक्ताः हविष्मान् हविषायु
क्तोर्थात् यजमानः आविवासति परिचरति विवासतिः परिचर्यायां वर्त्तते देवो

रद्दि कृते

ध्वरोयज्ञोहविष्मानस्त्व आसीरितिशेषः सूर्योपिहविष्मानस्त्वएतस्मैवैयत्लाति
यएषतपतीत्यस्ति पायः देवीरापइत्यादि हे आपः देव्यः अपान्नपात्संज्ञः वःयु
कल्लोल ष्माकं यः ऊर्मिः जलसंघातः तंशुक्रपेभ्योदेवेभ्यः दत्त प्रयच्छत शुक्रशब्द उप
लक्षणार्थः शुक्रसोमादिग्रहपातृभ्योदेवेभ्य इत्यर्थः तेकेयेषांदेवानांस्वयंभा
गः स्थः अंशाः स्वधः कल्लोलः किंभूतः हविष्यः यज्ञियः पुनः किंभूतः इंद्रियैवा
न् इंद्रियशब्देनवीर्यमभिधीयतेवीर्यवानित्यर्थः छांदसंदीर्घत्वंमदिंतमः मद
यितृतमः पुनः किंभूतः देवत्रा देवान्प्रतिपायी देवमनुष्येत्यादिनात्राप्रत्ययः ॥ शिवः ७
कार्षिरसीत्यादि हे अपः त्वंकार्षिरसि अपकृष्टमसि कृषिविलेखने देवतायात
क्रिनिरितिशेषः त्वात्वांसमुद्रस्यजलस्य अक्षित्यै अनुपक्षीणतायै उन्नयामि
उद्धृत्यामि आपोवैसमुद्र इतिश्रुतेः किंच हे आपः अद्भिः सम्यग्मत संगच्छ

त ओषधीभिः व्रीहि यवादिभिः सह ओषधीः मुद्गमसूरादिकाश्च समग्र
न तेनताः सम्युत्पद्यंते अपां कारणत्वादोषधीनामिति भावः। आपो देवीर्मधुमतीरि ५
गृह्ण त्यादि। या अपः देवा अग्रभ्णन् ताः गृह्णामीति शेषः किंभूताः अपः मधुमतीमु मधुस्वादुवती
नः किंभूता ऊर्ज्जस्वतीः अन्नवतीः ऊर्जमन्नं राजस्वः राजानं याः सुवते जनयं
ति ता राजस्वः चितानाः चेतयमानाः परिदृष्टकारिणीः किंच याभिः मित्रा
वरुणौ अभ्यषिंचन् अभिषिक्तवंतौ देवाः इन्द्रमनुहृत्रिः याभिश्च देवाः अरराती।
अरातीः शत्रुसेनाः अतीत्य इंद्रं अनयन् नीतवंतः। द्रुपदादिवेति संध्याप्रकर
णे लेखयंनी। शन्नो देवीरित्यस्य व्याख्यानं आचमनप्रकरणे द्रष्टव्यं। अपां रसमुद्वय
मित्यादि। अपां यो रसः सारः वायुः एष वा अपां रसो यो यं पवत इति श्रुतेः तं गृह्णामि
किंभूतं रसं उद्वयसं उद्गतं वयो अन्नं यस्मात् उद्वयसं सूर्ये समाहितं संतं किंच

अपां रसस्य वायो यो रसः प्रजापतिः हे आपः वो युष्माकं तमपि गृह्णामि उत्तमं
उत्कृष्टं ॥ आपो देवीरुपसृजेत्यादि पंक्त्या मादृग्निरुच्यते हे अग्रे यां देवीः आपः अ
पः उपसृज उपसृजसि विक्षिपसि अर्थात् वृष्टिरूपाः तासां स्वं गतानां आस्या
नात् समीपात् ओषधयः उज्जिहतां उद्गच्छन्तु किं लक्षणा ओषधयः सुपिप्पलाः सुफ
लाः पिप्पलं फलमुच्यते आपः किं लक्षणाः मधुमतीः रसवतीः किमर्थं विसृजसि
प्रजाभ्यः प्रजानां अस्माय अयक्ष्मत्वाय सा वप्रत्ययः यक्ष्मा व्याधिः ॥ पुनंतु मा पि लोपः
तर इत्यादि मा मां पितरः पुनंतु पवित्रं कुर्वन्तु किं लक्षणाः सोम्यासः सोमसंपादि
नः किं च पितामहाः पुनंतु प्रपितामहाश्च केन पवित्रेण शतायुषा शतमायुर्य शिवः
स्मात् तच्छतायुः यद्वा कारणे कार्योपचारात् पवित्रमेव शतायुः ॥ पुनंतु मा पिता ८
महा इत्यादि ॥ तथा मां पितामहाः पुनंतु आदरार्थो पमत्यासः ॥ विशेषार्थो वा

तथा विश्वं सर्वं आयुः अहं अदब्धः वै आप्नुयां प्राप्नुयामित्यर्थः अग्न आयूंषीत्यादि ॥
हे अग्ने यतस्त्वं स्वस्तावत एव आयूंषि पवसे आयुः प्रापकानि कर्माणि वेष्टयसे
अतः प्रार्थ्यसे ऊर्जं दध्याज्यपसेचनं इषं च व्रीह्यादिनः अस्माकं आसुव अनु
जानीहि एतत्पिजीवनहेतुरित्यभिप्रायः आरे दूर एव बाधस्व इतं सन्तं दुच्छुनां दुष्टं
श्वानं बाधस्व पीडितं कुरु श्वनः चात्र दर्शनपवित्रतयो लक्षणं तैः रहितः पुरुषः प
रमायुः प्राप्नोतीत्यभिप्रायः पुनन्तु मेत्यादि देवजनाः देवानुगामिनो जनाः मां पु
नन्तु मनसा युक्ताः धियः बुद्धयः पुनन्तु कर्माणि वा किंच विश्वानि भूतानि पुनं
तु हे जातवेदः अग्ने त्वमपि मां पुनीहि पवित्रेण पुनीहि मेत्यादि हे अग्ने मां प
वित्रेण पुनीहि किंभूत त्वं शुक्रेण शुक्लेन शोचिषा बलेन दीप्यत् दीप्यमानः किंच
हे देव क्रत्वा कर्मणा तांस्तान् क्रतून् यज्ञान् अनु क्रतौ मां पुनीहि यत्ते पवित्रमित्या
क्रसे

हि हे अग्ने ते तव अर्चिषि अंतरा मध्ये यत्पवित्रं विततं प्रसारितं वर्त्तते तेन पवित्रेण
३९ ब्रह्म त्रयीलक्षणं परं मां पुनातु अग्न्यनुज्ञातेनेति शेषः पवमानः सो अद्येत्यादि
स एव पवमानः सोमः अद्यास्मिन्नहनि पवित्रेण पुनातु किंभूतः पवमानः वि
चर्षणिः द्रष्टा । कृत्वा कृतप्रसवेक्षक इत्यर्थः यश्च स्वसावतः पोता रक्षकः वायुः
स मां पुनातु उभाभ्यां देव सवितर्भ्यामित्यादि हे सवितः देव उभाभ्यां विश्वतः सर्व
तः मां पुनीहि काभ्यां पवित्रेण सवेन च सवेन अनुज्ञया वैश्वदेवी सुराकुंभी प्र
क्रमात् पुनती पावनं कुर्वाणा आगात् आगताय स्यां इमा बह्व्यः धाराः तन्वः तनुः
शरीरं किंभूताः धाराः वीतपृष्ठाः काम्य[illegible]राः काम्यंते हि सुराधाराः तया म
दंतः मोदमाना वयं सधमाद्येषु सहमादनेषु रयीणां धनानां पतयः स्याम सधमा
दस्य यो अंशुं दसीति सहस्य सधाद्देशः चिसतिर्मा पुनाति मादिचिसतिः ज्ञानप

वैश्वदेवी पुनती त्यादि ॥

शिवः
९

तिः आत्मा मनोवा मामंउनातु . . . अथवा प्रजापतिः प्रजापतिर्वै विस

ति श्रुतेः वाक्पतिर्हृदस्पतिश्च मांउनातु सविता देवश्च मांउनातु केन अच्छिद्रेण

अनुपहतेन पवित्रेण सूर्यस्य रश्मिभिश्च हेपवित्रपते तस्य पवित्रपूतस्य मम यज्ञ

मानस्य तव प्रसवे आज्ञायां वर्त्तमानस्य हे सवितः एतद्भवतु। किंयत्कामः अहं आ

त्मानं पुनेपावयामि तच्छकेयं शक्नुयां यज्ञस्यांतं गच्छामीत्यर्थः। आयंगौरिमा

दि अयमग्निः पृश्निः मातः ऐश्वर्येणाक्रांतवान् जगदिति शेषः किंभूतो गौः गंता यासु ना

सुक्रियास्विति शेषः पुनः किंभूतः पृश्निः नानारूपः असदन्मातरं पुरः यः अग्निः

प्रातरादिसरूपेण इमां मातरं पृथिवीं पुरः पुरस्तात् प्राच्यां दिशि असदत् आसीद

ति अर्थात् इमं लोकमग्निरूपेणानुगृह्य किंच पितरं च प्रयन्स्वः सर्वः पितरं

द्युलोकं च ह्लालोकं वायुर्नंदतीयनुपष्यते स्वः सुस्वरूपः आदित्यः इतिकाती

पु गच्छन्सौ

आयंगौः पृ
श्निरक्रमीद
सदन्मातरं
पुरः पितरं
च प्रयन्त्स्वः।।

प्रस्नानमंत्रव्याख्या अथसंध्यामंत्रव्याख्या ऋतंचेत्यादि अयंचऋग्वेदीयोमंत्रः अ
यरश्चतैत्तिरीयः तत्ररात्रिरजायतेतिपाठः समुद्रोर्णवइतिच अकल्पयद्दिव मि
तिचसंहिता सचमंत्रोमाध्यंदिनीयैर्नपठनीयः [illegible] मनु
द्रोर्णवइतिच अकल्पयदिवमितिच [illegible] पठनीयः
याज्ञवल्क्योक्तीर्णत्वात् ऋतंसत्यमितिचब्रह्मणोनामनू तथाचश्रुतिः स्मृतिश्चऋत
मेकाक्षरंब्रह्म सत्यंज्ञानमनंतंब्रह्मेति तत्रातिष्ठत्संध्यां पि तेनायमर्थः ऋतंसत्यं
च अतिष्ठदितिशेषः अर्थात् सृष्टिपूर्वकाले तथाच तदानीं केवलं ब्रह्मैवासी शिवः
दित्यर्थः ततस्तदनंतरं प्रलयावस्थायामेव रात्री अजातय रात्रिरासीत् रात्रिश ०
ब्देनांधकार उच्यते तथाचसकलमंधकारमयमासीत्यर्थः तेजोत्तावस्थेवांधका
रत्वात् रात्रेश्चंद्राधीनत्वेनतदानीमसं त्त्वादेवेतिभावः तथाचस्मृतिः आ
दि

[illegible] स्यर्थः ॥ स धाता यथापूर्वं [illegible] सूर्याचंद्रमसौ अकल्पयत् [illegible] किंभूतौ सूर्याचंद्रमसौ [illegible]
[illegible]

सीदिदं तमोभूतमप्रज्ञातमलक्षणमिति ततस्तदनंतरं प्रलयावसाने सृष्ट्या
रंभसमये तपसः अद्दष्टात् समुद्रोऽजायत अर्णव तपसः किंभूतात् अभी
द्धात् अभितः सर्वतो भावेन इद्धात् दीप्तात् सर्वतो लब्धदृप्तेरित्यर्थः समुद्रः किंभू
तः अर्णवः अर्णः पानीयं तदस्यास्तीति अर्णवः पानीयमयः समुद्रः संजात इत्य
र्थः प्रथमतः सकलसंसारसृष्टिनिमित्तं जलराशिरुत्पन्न इत्यत्र प्रायः तथा
च स्मृतिः अप एव ससर्जादाविति ततस्तदनंतरं अर्णवात् समुद्रात् अधि पश्चात्
धाता विधाता अजायत धाता किंभूतः मिषतः पक्ष्मकटीलवतो विश्वस्य वशी महाप्र
लये विलुप्तस्यास्य त्रिलोकस्य विधाता एव स एव सविता स एव सर्गः सवितृसर्गयो
रद्वैतमेव तथा वराहोः शिरइतिवत् स्रष्टा पुनरपि किंभूतं सर्गं वरेण्यं वरणीयं
प्रार्थनीयं जन्ममृत्युदुःखादिनाशाय ध्यानेनोपासनीयमित्यर्थः तथा च यो

गियाज्ञवल्क्यः वरेण्यंवरणीयंचजन्मसंसारभीरुभिः आदित्यांतर्गतंयच्चभर्गा
ख्यंवा मुमुक्षुभिः जन्ममृत्युविनाशायदुःखस्यत्रिविधस्यच ध्यानेनपुरुषोयंच
द्रष्टव्यः सूर्यमंडलइति एवंगायत्र्यास्तस्यमाहात्म्यमुपवर्ण्यपुनस्तस्यैवमहाप्रभा
वत्वंसमस्याहृतिभिर्विशेषणभूताभिरभिधीयते तद्यथा किंभूतंभर्गंभूरादिव्या
प्यतिष्ठंतमितिशेषः तथाचभूरादिसप्तलोकप्रकाशक भूरितिलोकः भुवः
भुवर्लोकः अंतरिक्षंस्वर्लोकः महः महर्लोकः जनःजनलोकः तपःतपोलोकः
सत्यंसत्यलोकः एवमुपर्युपरिक्रमेणावस्थितान् सप्तलोकानभिव्याप्यावति शिवः
ष्ठमानोसौभर्गएतान्सप्तलोकानेवप्रदीपवत्प्रकाशयतीत्यर्थः यद्वा भूरादी १०
नांभर्गादिभेदएवप्रतिपाद्यःसप्तलोकाश्चेताःसप्तव्याहृतयएवेति पुनःकिंभूतंभ ११
र्गं आपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोंएतद्रूपमित्यर्थः सूर्यश्चेति मामांसूर्यश्चम मन्युश्च

न्युः पतयश्च रक्षंतां मन्युर्यज्ञः मन्युपतयः यज्ञपतयः इंद्रादयः केभ्यो रक्षंतां मन्युकृ
तेभ्यः पापेभ्यो असांगयज्ञकृतेभ्य इत्यर्थः यद्वा मन्युः क्रोधपतय इंद्रियाणि क्रोध
कृतेभ्यः पापेभ्यो रक्षंतां क्रोधानुत्पादेन तथा च ममैतादृशः क्रोधो मास्तु वतु येनाह
मकार्यं करोमीत्यर्थः किंच यत्पापं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना च रा
त्र्या अकार्षं कृतवानस्मि तत्पापं रात्रिः अवलुंपतु नाशयतु किंच यत्किंचित् मयि
मदाश्रितं अन्यदपि पापं तस्माद्रक्षंतां किंच हे आपः तदिदं पापं अहं सूर्ये
जुहोमि किंभूते सूर्ये ज्योतिषि हृदयमध्यस्थितप्रकाशरूपे प्रकाश
रूपे च नः किंभूते अमृतयोनौ मोक्षकारणे स्वाहा सुहुतं च भवतु अत्र मन्युर्यज्ञे
क्रतौ क्रुधीत्यमरः शिश्नेति शिश्नेनेति प्राप्ते छांदसत्वादिना देशो न भवति आपः पुनं
त्वित्यादि आपः पृथिवीं पुनंतु पवित्रां कुर्वंतु पृथ्वी अद्भिः पूता सती मां शोधयतु पुनातु

केवलमापः पृथिवीं पुनंतु किंच ब्रह्मणस्पतिं ज्ञानस्पतिं यद्वा वेदस्याश्रयं परमात्मा
नमपि पुनंतु तद्ब्रह्म पूता पूतं स्म मां पुनातु अत्र च पृथिवीपदेन पार्थिवो देहो विव
क्षितः ततश्च आपः पृथिवीं पुनंतु मदीयं पार्थिवं देहं पुनंत्वित्यर्थः तथा च देहपावना
द्वारा मामापः पुनंत्विति फलितार्थः उत्र च्छिस्म ये उच्छिष्टमपावनं अभोज्यं निंदित मम य
तोऽज्यं दुश्चरितं असदाचरणं असताम प्रग्राह्याणां प्रतिग्रहं च तत्सर्वं तत्र सर्वत्र मा
मापः पुनंत्वित्यर्थः इत्यमाशास्य या आपः आचम्यंते ताः स्वाहा सुकृता भवंतु तथा च
आपः आचमनेन च मदीयदेहपावनपूर्वकमुच्छिष्टत्वादिरूपं मां पावयंत्विति आशं शिवः
सा वाक्यार्थः अत्र पतिरिति सुपां सुपो भवंतीति द्वितीयायां प्रथमा पूताऽऽ इति पूतमि १२
त्यत्रार्थे लिंगव्यत्ययेन सर्वमिति सप्तमीस्थाने द्वितीया ॥ अग्निश्च मेति सं स्मे ब्रह्मणे सूर्ये
वा अन्यस्त्वर्थः सूर्यश्चमेति मंत्रवद्बोद्धव्यं आपो हिष्ठा इत्यादि अत्रे तच्छन्दोपादानान्न्य

॥ इष्ठाद्यार्थः हे आपः या यूयं मयोभुवः स्थ मय इति सुखनाम सुखस्य भावयित्र्यो भवथ
सर्वप्राणिनामिति शेषः हिशब्दोनर्थकः ता यूयं नो अस्मान् ऊर्जे अन्नाय दधातन स्था न
पयत यथा वयं सर्वसान्नादे सौन्नकालवेम तथा कुरुतेत्यभिप्रायः अन्नाधीनमे ।
वसुखमिति भावः किंच महते रणाय दर्शनाय महद्दर्शनं ब्रह्मदर्शनं चक्षसे आ
ख्यानाय च दधातनः चक्षिङ् आख्याने यद्वा महते चक्षसे दर्शनाय रणाय रमणी ।
याय ब्रह्मदर्शनायेत्यर्थः अथवा हिशब्दो यस्मादर्थे हे आपः यस्मान्मयोभुवः स्थ
ता तस्मात् नः ऊर्जे दधातनेत्यन्वयः ता शब्दः पंचम्यंतः हे आपः यो वो युष्मा
कं शिवतमः कल्याणतमो रसः नः अस्मान् तस्य भाजयतेह भागिनः कुरुत उश
तीरिव मातरः उशतीः कामयमानाः मातर एव वश कांता इति धा॰ शत संप्रसा तोः
रणे एतद्रूपं तथा च यथा पुत्रस्य कल्याणं कामयमानाः मातरः स्वैः स्वैः स्तन्यादि

रसैस्तंतोजययेयुः एवंतोजयत तस्मा अरं हे आपः तस्य च रसस्य पूर्वकं त्थ
तस्य वः क्षुष्मस्य बंधिनः अलंपर्याप्तिं सदा तृप्तिं गमाम गच्छाम अलमिति रलयो
रेकत्वस्मरणात् यस्य क्षयाय जिन्वथ क्षयाय क्षयस्य निवासस्य पंचात्मभूतिप
रिणाम क्रमेण ब्रह्मादिस्तंबपर्यंतस्य जगतः एकदेशेन जिन्वथ तर्पयथ जिन्वतिः
कृ॰ प्रीतिं हे आपः नोऽस्मान् जनयथ लोकत्वेनेति शेषः द्रुपदादिवेत्यादि मामां हे आ
पः शुंधंतु शोधयंतु कुतः एनसः पापात् कथमिव द्रुपदान् मुमुचानः स्विन्न इव
स्विन्नः स्वेदवान् आतप इत्यर्थः तथा च द्रुपदात् द्रुमपदात् मुमुचानः वह्निर्लवत् शिवः
आतपः यथा द्रुपदं नश्यति तथा मां पापं नश्यतीत्यर्थः स्नातो मलादिव यथा ॥ १३
स्नातः मलात् मुक्तो भवति पवित्रेण पूतं आज्यमिव यथा आज्यं पवित्रेण पूतं भव
तीति ऋतं च सत्यं चेति आख्या तं अंतश्चरसीत्यादि हे आपः त्वं ते भूतं अंतश्चर

सिचरथगुहायां विश्वतोमुखः विश्वतो विश्वस्मिन्मुखं संसरणं यासां ताः विश्व
तोमुखः विश्वतोमुख्य इत्यर्थः त्वं यज्ञः त्वमेव यज्ञः त्वं वषट्कारः त्वं ज्योतिः त्वं र
सः अष्टतं च त्वमेवेति उद्वयमित्यादि उत् इत्युपसर्गः अगन्म इत्यनेन क्रियापदे
न संबध्यते वयं सूर्यं देवं उदगच्छाम वयं किंभूताः स्वः स्वर्लोकं परि पश्यंतः किं सवितोभावेनपरि पश्यंत. प्र.
भूतं तमसः प्रकाशरूपाद्भूर्लोकादुत्तरं उत्ततरं ऊर्ध्वस्थितमित्यर्थः वयं किं
भूता देवत्राः देवेन सूर्येण त्राणं येषां ते देवत्राः सूर्यं किंभूतं ज्योतिः स्वरूपं
पुनः किंभूतं उत्तमं सर्वज्योतिषामग्न्यादीनामुत्कृष्टं अयमत्र वाक्यार्थः वयं सू
र्येण रक्षिता भूर्लोकस्योपरिस्थितं स्वर्लोकं पश्यंतस्तमिति कम्यपरं ज्योतिः स्व
रूपे सूर्ये संगता स्त्वाम इति सूर्ये प्रार्थना उदुत्यं जातवेदसमित्यादि उत् इत्यु
पसर्गः वहंतीत्यत्राध्ये उत्शब्दः श्रोत्रार्थः त्यमिति त्यद् शब्दस्य प्रयोगः त्यं तं सूर्यं

देवं केतवः रश्मयः उद्वहंति ऊर्ध्वं नयंति सूर्यं किंभूतं जातवेदसं अग्निं तेजोमयं
किमर्थमुद्वहंति विश्वाय विश्वस्य दर्शनाय अथवा वाक्यार्थः तेजःस्वरूपं सूर्यं देवं वि
श्वप्रकाशनाशनार्थं रश्मय ऊर्ध्वं वहंतीति आदित्योत्कीर्तनं कीदृशो सौ सूर्य इ
त्याकांक्षायामाह चित्रं देवानामित्यादि असौ सूर्यः चित्रमाश्चर्यं यथा स्यात् ए
वं उद्गात् उदितोभवत् सूर्यः किंभूतः मित्रस्य वरुणस्य अग्नेः त्रयाणां देवानां च
क्षुः अक्षिवत् नः किंभूतः देवानामनीकं मित्रादिव्यतिरिक्तानामन्येषां समूहः
उदितश्च द्यावापृथिवी द्यावापृथिव्यौ अंतरिक्षं च स्वर्गमर्त्यावकाशं आप्राः आपू
रितवान् स्वस्य रश्मिजालेनेति शेषः पुनः किंभूतः जगतः जंगमतस्थुषः स्थाव
रस्यात्मा स्थावरजंगमात्मा स्थावरजंगमात्मकसकलसंसारमयोयमेव सूर्य इत्य
र्थः आप्रा इति आङ्पूर्वकस्य प्रा पूरणे इत्यस्य लङ् प्रथमैकवचनस्थानेति

त्रिष: १४

डो भवतीति मध्यमपुरुषैकवचनं तच्चक्षुः किंभूतमित्याकांक्षायामाह तच्चक्षु
रिति ततश्चैवं चक्षुः कीदृशं देवहितं देवानां समीहितं कर्तृभूतः किंभूतं शुक्रं नि
र्मलं पुनः कीदृशं पुरस्तात् प्राच्यां दिशि उच्चरत् उद्गच्छत् तदेतस्योपस्थानं कृत्वा
शरदः वर्षस्य शतं पश्येम एवं च शरदः शतं च जीवेम शरदः शतं शृणुयाम शर
दः शतं प्रब्रवाम प्रकर्षेण ब्रुवाम शरदः शतं अदीनाः अदैन्ययः स्याम किंच
न केवलं शरदः शतं किंतु शरदः शतादपि भूयः अधिकं पश्येमेत्यादि तेजोसी सर्वत्रात्वेति
त्यादि गायत्र्यस्तोति त्वं तेजः असि शुक्रं असि अमृतं असि धाम गृहं असि नाम
अभिधानं असि यत् देवानां अनाधृष्टं उत्कृष्टं प्रियं तत्त्वमेवासि देवयजनं देवा
इज्यं तेनेनेति देवयजनं मन्त्रादि तत्त्वमेवासि गायत्र्यस्येत्यादि त्वं गायत्री असि
गायंतं त्रायत इति गायत्री एकपदी द्विपदी त्रिपदी चतुष्पदीति स्वरूपकथनं॥

अपदस्मिन्पद्यते ज्ञायते इत्यत् नहि पद्यसे किंच तेतुरीयाय पदाय स्वरू
पाय ब्रह्मविष्णुशिवभिन्नाय ब्रह्मस्वरूपायेत्यावृत्त् नमो स्त्विति शेषः यद्वावि
राट् हिरण्यगर्भादिकारणोपाधित्रय हीनाय ईश्वराय वे शरीरूपो पायकं यद्वा
दर्शनीयाय तृताय दर्शताय ध्यानेनेति शेषः परोरजसो रजसः परस्तात् ताय शुद्धसत्वरूपा
येत्यर्थः अथ तर्पणमंत्रव्याख्या उदीरतामित्यादि उत् इत्युपसर्गः अवरे
ण एतल्लोकवर्तिनः पितर उदीरतां ऊर्ध्वंक्रामंतां अस्मादपि स्थानात् विशिष्टतरं गच्छंतां
स्थानं गच्छंतु उत्मध्यमाः मध्ये सर्वामध्यमा ये मध्यमाः मध्यलोकस्थाः ते पितरो १५
पि उदीरितां विशिष्टतरं स्थानं गच्छंतु पितरः किंभूताः सोम्यासः सोमसंपादिनः
असुं य ईयुरिति ये असुं प्राणं वायुं चैवृवीयुः अनुगताः वातात्मान इत्यर्थः ऋ
तज्ञाः सत्यज्ञानाः स्वाध्यायनिष्ठाः यज्ञनिष्ठा वा ते पितरो पि विशिष्टमुत्कृष्टस्थान
[illegible] ते दिवि [illegible] उत्कृष्टलोके [illegible]

गछंतु एवंचकीयेनकर्मणायेअस्मदीयाः पितरः उन्नतिंप्राप्तास्तेनः अस्मान्
दुःखेषुआक्रांतेषुअवंतुपालयंतु अंगिरसोनः पितरोनवग्वाअथर्वाणोभृगवः
सोम्यासः तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम॥ वयंतेषांपि
तृणांसुमतौकल्याणमतौस्याममद्विषयेकल्याणीमतिर्भवत्वित्यर्थः यज्ञि
यानांअ पिभद्रेवंदनीयेसौमनसेकल्याणमनसिस्यामभवेमतेकेभ्यः
अस्माकंपितरः अंगिराऋषिस्तस्यापत्यानिवर्द्धनयेचनवग्वाः नवगतयःपु
नःपुनरागमागत्यगछंतिनवनीयास्तोतव्यागतिर्येषांतेयेचअथर्वाणः अथ
र्वणअपत्यानिभृगवःभृगोरपत्यानिसोम्यासःसोमसंपादिनः आयंतुनःपितरः
सोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदंतोधिब्रुवंतेव
स्मान् नःअस्माकंपितरः आयंतुआगछंतुकिंभूताः सोम्यासःसोमसं

पादिनः पुनः किंभूताः अग्निष्वात्ताः अग्निना सुपथा स्वादेवं स्वात्तास्वदिताः श्रौत
स्मार्ताग्निदग्धा इत्यर्थः यथा अग्निना दग्धा एवोच्यंते तेतेषा एव श्राद्धयोग्या इत्यति
प्रायः कैः आयंतु पथिभिर्मार्गैर्देवयानैर्देवस्य यानं गमनं यत्र तैर्देवसद्गम
नैरिति यावत् देवसद्गामिनस्ते पितरो येषां पुत्रपौत्रप्रपौत्रैरेतत्कर्म क्रियते उ
क्तंच पुत्रेण लोकान्जयति पौत्रेणानंत्यमश्नुते अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नो
ति लोकतामिति आगमंतु पितरः अस्मिन्यज्ञे श्राद्धे स्वधया अन्नेन मदंतः परि
तृप्यंतः तुष्टाः संतः अस्मान् अधिब्रुवंतु अधिकं ब्रुवंतु श्लाघयंत्वित्यर्थः किंच अव
तु रक्षंतु ॥ ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पित शिवः १६
न् ॥ हे आपः यूयं स्वधास्थ पितृणामन्नं स्वरूपस्थ आत्मानं शरीरं दधति पोषयती
ति स्वधा धायो षणो तत्पितृणामेव तथा च श्रुतिः स्वधा पितृणामन्नमिति तेन मे

ममपितॄन्तर्पयतस्मान्ऊर्जंतयूयं किंभूताः ऊर्जंवहंती ऊर्जमन्नंवहंत्यः आ
पयंत्यः ऊर्जं किंभूतं अमृतं घृतं पयः कीलालं परिस्रुतं एतद्व्यमित्यर्थः अमृतं
देवानामन्नं घृतं प्रसिद्धं पयो दुग्धं कीलालं कीलुः कीलंबंधनयोग्यमस्येति की
लालं परिस्रुतं स्वधा तथाचयतो नानाविधमन्नं वहंत्यः स्वधा लवथ तस्मान्मम
२ पितॄंस्तर्पयत इति वाक्यार्थः ॥ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधा
यिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्पितरो मीमदंत पि
तरो तीतृपंत पितरः शुंधध्वं ॥ स्वधायिभ्यः पितृभ्यः स्वधा नमः स्वधा स्त अन्नमित्यर्थः
स्वधां प्रतिगमनशीलाः स्वधायिनः सुप्यजातौ णिनिस्ताच्छील्ये पितृभ्य इति बहुवच
नं पितृव्यक्त्यपेक्षं पूजार्थं वा एवं पितामहेभ्यः प्रपितामहेभ्यः स्वधा नमः अत्रापि बहुव बहु,
नं पूर्ववत् किंच अक्षन् अक्षन्मीमदंत ह्लवशियात्र धूपतस्वलानवोविप्रतविश्

पितर

नविष्टयामतीयोजांत्विंदंतेहरी॥ अन्नवंतः अदनशीलोऽन्नवंतः नक्षितवंतः अमी
मदंतः मुदितानवंतु मुदितापितरः अतीतृपंतु तर्पितानवंतु किंच हेपितरः
त शुंधध्वं पापप्रक्षालनंकुरुध्वं॥ येचेहपितरो येचनेह यांश्चविद्मयांश्चउचनप्रविद्मत्वं
वेत्थयतितेजातवेदः स्वधाभिर्यज्ञंसुकृतंजुषस्व॥ हेजातवेदः अग्नेतान्पितॄन्
त्वंवेत्थअज्ञातंनास्ति अतएवमुच्यतेस्वधाभिःपितृसंबंधैर्हविर्भिर्यज्ञंपितृयज्ञंसुकृतं
साधुकृतंजुषस्वसेवस्वते केयेइहसंति अस्मत्समीपइहलोके वाऽत्रेसंतेयेच इहना
संतेअन्यत्रसंतियान्पितॄन्विद्मः अवगच्छामः यांश्चनविद्मः नप्रजानीमः उका
रः पादपूरणे पितॄन्किंस्तुतान् यतिअविनक्तिकोयंनिर्देशः यतीन्प्रशंसीन नि त्रिख: २१
त्यनैमित्तिककर्मकरणान्निर्दग्धकल्मषान्॥ मधुवाताऋतायतेमधुक्षरंतिसिंधवःमा
ध्वीर्नःसंत्वोषधीः मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः मधुद्यौरस्तुनःपितामधु

वसंतेति मध्वादयो रसाः सोम... पद्धा... पतं सा पितर एवं नमस्क्रियंते हे पितरः वः
युष्माकं रसा घत सतस्कृ... ३

रः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृ
हान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वासः॥ हे पितरः वः युष्माकं संबंधित्वता
य रसाय रसप्रधानाय वसंताय नमः एवमग्रेपि व्याख्येयं। शोषाय शोषप्रधानाय
ग्रीष्माय ग्रीष्मे हि शोषयंत्योषधयः जीवाय जीवनहेतुत्वताय वर्षासु स्वधायै पितृ
णामन्नहेतुत्वताय शरदे शारदिकाय शरदि व्रीह्यादयो भवंति घोराय हेमंताय हिमंतो
हि घोरः शीतप्राचुर्यात् मन्यवे शिशिराय मन्युः क्रोधः क्रुधाद्वशिशिरश्रोषधीर्दहंति॥
नमो वः पितरः पितर इत्यादरार्थवीप्सा हे पितरः वः युष्मभ्यं नमः नः अस्मभ्यं गृहान्
दत्त भार्यापुत्रपौत्रादयो गृहशब्देनोच्यंते किंच युष्मत्प्रसादात्तथा नवं तु गृहे सतः शिवः
विद्यमानात् द्रव्यात् वः युष्मभ्यं देष्म दास्याम तथाच दयस्व मम गृहं मा त्यज त्विशा ता १८
स्मदेतद्वासः ऊर्णा नं प्रथमं पुरस्तादि सीमतं सुरुचो वेन आवः स बुध्न्या उपमा अस्य

इति शीर्षरागामंत्रव्याख्या॥५ ता २ यचेह पितरः २

सिंधवः मधुक्षरंतीर

मान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः माध्वीर्गावो भवंतु नः ॥ वाताः वायवः मधु ऋता
यते ऋतं यज्ञं ॥ उपगच्छंतु वायवो मधु वहंत्वित्यर्थः सिंधवः मधु क्षरंतु नद्यो मधु
मध्वो भवंतु ओषधीः ओषध्यः धान्यादयः माध्वीः मधुमय्यः संतु नक्तं रात्रिः मधु
अस्त्विति शेषः मधुमती भवतु उत समुच्चये उषसोपि प्रातः कालाः मधुमया
भवंतु पार्थिवं रजः मधुमदस्तु द्यौः स्वर्गः मधु मधुमदस्तु द्यौः किंभूता पितेव
सर्वस्यानुकूलेत्यर्थः वनस्पति सोमः नः मधुमानस्तु सूर्यश्च नः मधुमानस्तु
गावश्च माध्वीः मधुमय्यो भवंतु ऋतायते ऋ गति प्रापणयोरिति धातोः लेट् तिङ्
तिङ् भवंतीति बहुवचने एकवचनं क्षरंती स्यादाशंसायां लोट् माध्वीरिति सुपां
सुपो भवंति इति शमायां द्वितीया सर्वमेतन्मधुमयं भवत्विति आशंसायां वाक्यार्थः ॥
नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो पित रः

विष्टाः सं तेस्य योनिमस्तत्स्य विवः त्वलत्र्यादित्यस्वरूपं तरस्वान् प्राच्यां दिशि प्रथमं ज
ज्ञानं अजायत इत्यर्थः तनोनंतरं सीमतः मध्यस्थानात् ... वोस्मा
लोकान् न् व्यावः विआवः व्याहृणोति विवृतान् करोति मध्यस्थानं सुरुचो रोचमानान् सू किंभूतान्
र्यः किंभूतः वेनः कांतो मेधावी वा स एवादित्यः बुध्न्या उपमा अस्य दिशः इति यावत्
व्यावः इत्यनेनान्वयः बुध्न्यमंतरिक्षं तत्र भवा बुध्न्या उपमीयंते आसु स्थितानीति उ
पमाः किंच अस्य जगतः विष्टाः विविधं स्थानं सतः मूर्तस्य असतः अमूर्तस्य
आकाशादेः योनिं स्थानं विवृणोति तस्मादादित्य एव सर्वप्रकाशक इति सू
यते इदं विष्णुरिति व्याख्यातं नमस्क इति आह स्मृतेनेति च व्याख्यास्यते मित्र
स्य चर्षणीधृतो चर्षणीधृतः मनुष्याणां धारिणः कृतस्य मित्रस्य देवस्य अवः
रक्षणं वर्द्धयन्त्स्यम् इति वाक्यशेषः अवः कीदृशं सानसि सनातनं उराणं किं
वो देवस्य सानसी द्युम्नं चित्रश्रवस्तमं ॥

तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्॥ नृषद्व
रसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ ६ स

जनाँ अनु गतानां भ्राजंतो अ
ग्नयो यथा॥ ३

प्यादसंरूप।
रश्मय। २

चक्ष्म मंत्रयज्ञः अग्नं च याचे महीति वाक्यार्थः यानं किंभूतं चित्रश्रवस्तमं अतिश
येन चापनीयं अथवा यस्य एताभ्यां अवः धनं वयं यजमानः स्यामि मंसाधयत्वित्य
र्थः इमं म इति व्याख्यातं अदृश्रमस्य केतवो विरश्मयो अदृश्रं ∽ दृश्यंत इत्यर्थः अस्य सूर्यस्य र रश्मयः।३
किंभूताः केतवः ज्ञानजनकाः केतुरिति ज्ञाननामसु पठितमित्युक्तः विश्वस्य न
र्थकः पुनः किंभूताः जनान् अनुगताः भ्राजंतः दीप्यमानाः कीदृशो दृश्यंते यथा
सूर्यसोतिहं। अग्नयः इत्थं हंसः शुचिषद्वसुरं हंसः सूर्यः हंति गच्छतीति हंसः शुचिषत् शुचौ
वह्निमंडले सीदति तिष्ठतीति शुचिषत् वसुः तेजोरूपः आकाशें तरिक्षे सीद
ती अंतरिक्षसत् होता होममंत्रेण देवानामावाहनकर्त्ता वेदिषत् यज्ञवेद्यां अ शिवः
ध्वर्यरूपेण सीदति अतिथिः क्वचिदपि न स्थापीनि सञ्चमणशीलः दुरोणसत् १९
दुरोणे गृहे सीदतीति गृहस्य रूपोपमने वेत्यर्थः नृषत् नृषु मनुष्येषु सीद

तीतिजीवात्मत्वेनेतिशेषः वरसत् वरेषु उत्कृष्टस्थानेषु सीदतीति देवत्वेनेति
शेषः ऋतसत् ऋते सत्ये ज्ञाने सीदतीति परमात्मत्वेनेत्यर्थः व्योमसत् व्योमन्त्र
रिक्षं तत्र सीदतीति ज्योतिः स्वरूपेण अब्जाः अप्सु जायते अग्निरूपेण गोजाः
[illegible]ः गविपृथिव्यां जायते जरायुजांडजोद्भिज्जरूपेणेति ऋतजाः ऋते सत्ये
जायते त्रयीरूपेण अद्रिजाः अद्रौ पर्वते जायते स्फुलिंगरूपेण ऋतं सू
क्ष्मं वृहत्स्थूलं सर्वव्यापितया अनवच्छिन्नपरिमाण इत्यर्थः तथाम्नायमे
व ब्रह्मरूप इति स्तूयस्कृतिः॥ सं वर्च[illegible]सा। वयं वर्चसा ब्रह्मवर्चसेन पयसा दु
ग्धेन अर्थात् गोभिः तनूभिः ताभ्यो उत्पादितैः शिवेन कल्याणेन मनसा च
सं अगन्महि संगताः स्मो वयं किंच सुदत्र कल्याणदः त्वष्टा मम रायो धना
नि विदधातु किंच तन्वः शरीरस्य यद्विलिष्टं मंदं श्लिष्टं पापादि तत् अनु

संतनूभिरगन्महि मनसा संशिवेन त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टम्॥४

मार्ष्टुं शोधयतु देवा गणा तु विदद्व तेषामग्रे आख्यास्यते इति स्नानोत्तरकर्ममंत्रव्याख्या
अथ देवपूजामंत्राः आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन
सविता रथेना देवो याति भुवनानि पश्यन् सविता आयाति आगच्छति किंभूतः सवि
ता देवः स्तुतिदीप्तिक्रीडादियुक्तः के[illegible]याति रथेन किंभूतेन हिरण्ययेन सौवर्णेन किं कु हिरण्य४
र्वन् भुवनानि पश्यन् भुवनवर्त्तिलोका[illegible]पुण्यपापकर्त्तृन् साक्षिवन्निरीक्षमाणः
इत्यर्थः न केवलमेवं किंतु अमृतं देवं मर्त्यं मनुष्यं च निवेशयन् स्वे स्वे व्यापारे इति शे
षः मनुष्यादिस्तु सूर्योदये यागादिभिर्देवान् प्रीणयंति तेच वृष्ट्यादिना मनुष्यान् प्री त्रिव: २.
णयंतीत्यर्थः किंभूतः सविता आवर्त्तमानः पुनस्तमेव देशमागच्छन् केन सह र
जसा रात्रिकालेन प्रायो रात्रौ रजोगुणबाहुल्येन रजः शब्देन रात्रिरुच्यते किंभूते
न रजसा कृष्णेन मलिनेन प्रायो रात्रिकाले पुण्यकर्मणां मनुष्यादीनां रात्रेः कृष्णमु

ॐ अथवा वाक्यार्थः यः सविता ःदत्ता देवः मनुष्यमापारस्थापकः यस्य स्मरणपाप
साक्षीतस्याग्रेऽप्यदिति किमुचितमिति अत्र आयातीतिमवदितेनाऽस्य संबंधः आवर्त्त
२० मान इत्यत्र छंदसि अवदिताश्चेति पाणिनीयसूत्रात् हिरण्यइति हिरण्मयार्थेनि
पातः गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे निधीनां त्वा
निधिपतिं हवामहे वसो मम आहमजानि गर्भधमा त्वमजासि गर्भधं॥ हे वसो मम स
र्वस्व भूत त्वां हवामहे आकायामः त्वां किंभूतं गणानां मध्ये गणपतिं गणाः कूष्मां
डादयः प्रियाणां मध्ये प्रियपतिं निधीनां मध्ये निधिपतिं निधयः पद्मादयः तथा चाबि
भ्रोप शमायत्ता यादि प्रिय लालायचलां आकायाम इति वाक्यार्थः अस्यं प्रार्थयं
ते स्त्रियः अहमजानीति हे अस्य त्वं मदं गर्भधं आजानिज्ञा नतवती अतहे अस्य त्वं ग
र्भधं असि गर्भधोत्वेत्यर्थः अंबे अंबिके अंबालिके न मा नयति कश्चन ससस्त्य

श्वकः सुभद्रिकां कांपीलवासिनीं अंबा अंबिका अंबालिका एतानि दुर्गानामा
नि हे अंबे हे अंबिके हे अंबालिके मां कश्चन कश्चिदपि न नयति नाञः यपनि
न प्रापयति स्वामिसन्निधानमिति शेषः तथा च ससस्ति अश्वकः पतिः सशास्ति शे
ते अश्वशब्दः पतिवचनः ऊस्मायां कृत्वा किं कृत्वा सुभद्रिकां परिरभ्येति शेषः
सुभद्रिकां किंभूतां कांपीलवासिनीं कांपीलं नगरं तत्र वसतीति कांपीलवा
विनीताश्च ५ सिनी कांपीले हि सुरूपाः सुभगाः स्त्रियो भवंति अत्रायं वाक्यार्थः अनेन म
न्त्रेण सौत्राग्प्रकामनया स्त्रिया देवी पूज्यते हे अंबे इत्यादिना दुर्गां संबोध्य क शिवः
श्चिदपि मां स्वामिसन्निधिं न नयति तेन मया विना मदीयस्वामी अन्यां गृहीतवान्तो २१
व न तो मया पूजिता भवती मां स्वामियुक्तां करोत्विति तासर्प्पं। ससस्तीति सस स्वाप
शनिधातोः रूपं ॥ अग्निं दूतं पुरो दधे। अहं अग्निं पुरो दधे अग्रतः स्थापयामि अ
हव्यवाहमुपब्रुवे देवां आ सादयादिह ॥

ति किंभूतं इतं देवा कान कर्त्तारं पुनः किंभूतं हव्यवाहं हविषो वोढारं तदनंतरं उपब्रुवे उ
पगत्य ब्रवीमि किं इह देवान् आसादयात् इह यज्ञगृहे देवानासादयेत्यर्थः विष्णोरर
टमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा यज्ञगृहाव
यवस्थापने विनियोगोस्य मंत्रस्य रराटस्थापाति ररारीवर्त्तिबंधः त्वं विष्णोः रराटमसि का
ररा टं ललाटं विष्णोः श्नप्त्रे स्त्रः द्वे णी स्थः येन सीव्यते १४ तं अस्माद् विष्णोः स्यूरसि सीव्यते अ
नेनेति स्युः ग्रंथिं करोति विष्णोर्ध्रुवोसि ध्रुवः ग्रंथिस्समाहरद स्थापाति त्वं वैष्णवं
विष्णुदेवताकमसि अतस्त्वां विष्णवे स्थापयामीत्यर्थः नमः शंभवाय च मयोभवाय च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ शंभवाय नमः शं भव
त्यस्मादिति शंभवः मयः सुखं भवत्यस्मादिति मयोभवः तस्मै मयोभवाय च शं करोती
ति शंकरः मयः सुखं करोतीति मयस्करः शिवाय कल्याणाय शिवतराय कल्याणत

वा यच केचित् त्र्यंबकं यजामहे इति मंत्रेण पूजयंति स च नीलसूक्ते व्याख्यातव्यः अ
थास्याघमंत्रस्याख्यानं विश्वे देवास आगत शृणुता म इमं हवं एदं बर्हिर्निषीदत हे
विश्वे देवाः यूयं मेम म इमं हवं आह्वानं शृणुत तच्छ्रुत्वा च आगत आगच्छत आगम्य च इदं
बर्हिः कुशाः आनिषीदत उपविष्टा तवत्र आसनार्थोपकल्पितेषु कुशेषु उपविष्टाः
नवतेत्यर्थः अत्र विश्वे देवास इति अजसेरसुगिति असुगागमः शृणुता इति तस्य ता
इत्यादेशः ॥ विश्वे देवाः शृणुतेमं हवं मे ये अंतरिक्षे य उप द्यवि ष्ठ ये अग्निजिह्वा उत वा
यजत्राः आसद्यास्मिन् बर्हिषि मादयध्वं ॥ हे विश्वे देवाः ते यूयं मम इमं आह्वानं शृणुत हव
ते के ये यूयं अंतरिक्षे स्थ तिष्ठथ ये च उप समीपे पृथिव्यां ये च द्यवि स्वर्गे स्थ ये च अग्निजिह्वा शिवः
अग्निरेव जिह्वा हविर्भोजनसाधनं येषां ते उत वा ये यजत्राः यजंते आद्यकारिणं त्रायंत २२
इति यजत्राः उरुरवो यमाद्यव शस्तनय किं हव अस्मिन् बर्हिषि आसाद्य आसनेन

आद्धानेक्रिय
र्थे क्रित्वाह
हविषे अत्त
द्र हविर्षि
...तदवि
मर्थे अत्तवे
अदनायाय
द्वाह्विषः १

त्वामादध्यध्वंद्धस्थानवयस्त्वार्थे शिच् उशंतस्त्वा निधीमह्युशंतः समधीमहि उशन्नुश
त आवह पितॄन्हविषे अत्तवे इदे अग्ने त्वां निधीमहि आदधामतवाधानं कु
र्मः इति यावत् वयमित्यध्याहार्यं वयं किंभूताः उशंतः इच्छंतः अर्थात्त्वाय यापित्राका
नं किंच उशंत एव वयं त्वां समधीमहि ज्वालयामः ते न त्वं पितॄन् आवह आकर्षय त्वं किंभू
तः उशन् इच्छन् हविरिति शेषः पितॄन् किंभूतान् उशतः इच्छतः आत्मीयं हविरिति
शेषः अ० अत्तवे अदनाय याचदे अग्ने एवमाराधितस्त्वमस्मत्पितॄना वाह्ये ..तिवा
क्यार्थः अत्तवे इति तुमन्नर्थे तवेङ्प्रत्ययः आयंतु नः पितरः सोम्यासो अग्निष्वात्ताः
पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तो अधिब्रुवंतु ते अवंत्व ॥ नः अस्माकं पितरः स्मान् २
आयंतु आगच्छंतु किंभूता अग्निष्वात्ता अग्निना सुपथा स्वादितं दाघात दृशा एव हि
ती आस्वाद्य सोम्यपानवं प्रतिप्रायः कैरागच्छंतु पथिभिः किंभूतैः देवयानैः देवानां यानैः

अत्ता भक्षिता श्रौतस्मार्त्ताग्नि दग्धा इत्यर्थः । ...द्वा अग्निना सुपथा स्वादितं २

स्वधया अधिब्रुवन्तु

संचारो येषैरित्यर्थः आगत्य च अस्मिन्यज्ञे स्वधया जे अस्मानधिब्रुवंतु आशासयंत्वित्यर्थः
पितरः किंभूताः स्वाधीयान्तेनमदंतः तृप्यंतः किंच न केवलं अधिब्रुवंतु किंतु ते अस्मा
नवंतु च रक्षंतु सोमपा अग्निष्वात्तादयः पितरः आगत्य मास्माधं नारक्षंतु चेति वाक्यार्थः
शंनो देवीरभिष्टय आपो भवंतु पीतये शंयोरभिस्रवंतु नः आपः अस्माकं पितृ
णामिति शेषः शं भवंतु कल्याणप्रदा भवंतु किंभूता देवीः देव्यः स्फूर्तिक्रीडादियोग्याः कि
मर्थं अभिष्टये उपचयार्थं पीतये पानाय च किंच नः पितॄणां शंयोः कल्याणयोगाय
अभिस्रवंतु अभिमुखं स्रवंतु शंयोरिति शंशब्दात्मत्वर्थीयो युस्प्रत्ययः चतुर्थ्यर्थे षष्ठी ध्रुवोसि
ध्रुवयास्मद्द्वेषो यवयारातीर्दिवैत्वांतरिक्षायत्वा पृथिव्यैत्वा शुंधंतां लोकाः पितृष शिवः
दनाः पितृषदमसि ॥ हे ध्रुव यवयोसि पृथक्करणोसि अतः अस्मद्द्वेषविषः अस्मदरातीः २३
श्च यवय परस्परं निमानसंहतिरहितान्कुरु तथा च यतस्त्वं पृथक्कारी ततो मच्छत्रून्पि

ह्यकुर्वित्यर्थः द्विषः कृत्रिमशात्रवः अरातयः सहजशात्रवः यद्वा इति शुभिरणोऽस्य
स्यपचाद्यद्य अस्यैवयवइति रूपं अरातिशब्दः स्त्रीलिंगोपि वेदे॥ तिलोसि सोमदेवत्यो
प॰ क॰ २ गोसवो देवनिर्मितः प्रत्नमद्भिः पितॄन्लोकान्प्रीणाहि नः स्वाहा॥ तिलोसि पवित्रत्वे
इत्यर्थ नत्वं तिलोसि सोमदेवता सोमदेवत्यः गोसवः गां स्वर्गं सुतेति गोसवः देवेन विष्णु
ना स्वयं निर्मितः अद्भिः पृक्तः मिश्रितः यत त्वमेवं त्वतः सर्वोत्कृष्टः अतः नः अस्माकं पि
तॄंल्लोकान् पितृपितामहप्रपितामहादीन् प्रत्नं चिरकालं स्वधया स्वधाकारेण आप्री
याप्रीणनं प्रीणाहि प्रीतान्कुरु स्वाहा सुहुतोस्तु॥ यादिव्या आपः पयसा संबभूवुर्याअं तु
तरिक्षा उत पार्थिवीर्याः हिरण्यवर्णा यज्ञियास्तान आपः शिवा सं शं स्योनाः सुहवा
भवंतु॥ आपः अस्माकं शिवाः क्षेमा भवंतु याः पयसा संबभूवुः पयसा क्षीरेण सं
युताः बभूवुः माधुर्यादि शीतत्वादिना एकीभूता इत्यर्थः यादिव्यादि विस्वर्गेण वा

या अंतरिक्षाः अंतरिक्षे भवाः उत अपि च याः पार्थिवीर्याः पृथिव्यां भूताः आपः किं
भूताः हिरण्यवर्णा हिरण्यं रजतं तत्समानवर्णाः पुनः किंभूताः यज्ञियाः यज्ञार्हाः
ताः आपः नः अस्माकं शिवाः क्षेमाः भवंतु न केवलं क्षेमाः अपि कल्याणरूपाः भवंतु स्यो
नाः सुखदाश्च सुहवाः सुष्ठु ब्राह्मणैः दत्तेन कृताः भवंतु स्योनं सुखं नाम निरुक्ते ॥ पि
तृभ्यः स्थानमसि ॥ हे पात्र पितृभ्यः पितॄणां स्थानमंत्व वसि यतस्त्वं पितॄणां स्थानं त्व श्लो ५.
वसि अतः पितॄणां अवस्थानाय न्युब्जीकृतमिमस्तिपाव्यः आवृताः तत्र तिष्ठंति पि
तरः श्राद्धदेवताः इति प्रमाणमंत्रः अग्नये कव्यवाहनाय स्वाहा अग्नये स्वाहा
अग्नये किंभूताय कव्यवाहनाय कव्यं पितॄणामन्नं तत् सिद्धं सो वहति प्रापयतीति शिवः
कव्यवाहनं सोमाय पितृमते स्वाहा किंभूताय पितृमते पितरस्तत्र संतीति पि २४
तृमान् तस्मै मधुवातेति व्याख्यानं तर्पणे पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे

सोमाय स्वाहा २

अमृतेऽमृतं जुहोमि स्वाहा । हे अग्ने करणभूतेन वाधारः पृथिवी विश्वाधारभूता
द्यौः आकाशं अपिधानं आवरणं त्वां च ब्राह्मणमुखे जुहोमि किंभूतं अमृतं कृता
वशिष्टे मुखे किंभूते अमृते अनष्टे नष्टान्नप्राणादिभिरदूषिते अन्नमदपिद्धविः अ
मृतरूपदर्शनोपपन्नं भवति तेन पिधानं क्रियत इत्यर्थः पृथिवी ते पात्रमित्यनेन तु
भोजनपात्रमभिधीयते ब्राह्मणमुखस्याग्निरूपत्वात् जुहोमि इत्युक्तं इदं
८ विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे विष्णुर्भगवान् इदमन्नं विचक्र
मे आक्रांतवान् व्याप्त । विष्णुस्त्रेधा त्रिप्रकारेण पदं चरणं निदधे निहितवान् पृथि
व्यामाकाशे स्वर्गे च तेन समूढमस्य पांसुले अस्य विष्णोः पदं पांसुले धूलिमये
प्रदेशे अर्थात् पृथिव्यां समूढं सम्यक् निविष्टं । तथा च विष्णुः पृथिव्यां पदं निहितवान्
नूनं तो रक्षसा तस्मादपसरंत्विति वाक्यार्थः अपहता असुरा रक्षांसि वेदिषदः ॥
तस्माद्गुरुत्वेनान्नमच्छाक्रांतवा ।

किंभूता

असुरा अपहता अपसारिताः संत्विति वाक्यार्थः वेदिं वेदः वेदिस्थानार्थे परिस्कृतामग्
मिः तत्रसीदंतिष्ठति वेदिषन केवलमसुराः किंतु रक्षांसि रक्षसाश्च अपसरिताः सं
तु तथा च तिलप्रक्षेपणासुरादयः श्राद्धस्थानेदं पसरं त्विति वाक्यार्थः गायत्रीमधु
वातेति व्याख्याता ये रूपाणि प्रतिमुंचमाना असुरा संतः स्वधया चरंति परापुरोनि
पुरो ये लरंत्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् उल्मुकं पुरस्तात्करोति ये असुराः पितृरू
पाणि आत्मनि प्रतिमुंचमानाः बध्नंतः प्रतिपूर्वो मुंचतिर्धारणे स्वधया पित्रेणान्नेन
स्वा ४ तृतेन अस्मात्निरेदितव्यमिति च रंति किंच परापुरः पराक्रांताः पुरः शरीराणि म
हांति निपुरः निकृष्टापुरः सूक्ष्माणि शरीराणि ये लरंति बिभ्रंति धारयंति अग्निस्ता शिवः
न सुरान् अस्मात् लोकात्स्थानात् प्रणुदाति प्रेरयति प्रतिपूर्वो मुंचति बंधनार्थः अग्न २५
ग्निदग्धाश्च ये जीवा ये प्रदग्धा कुले मम तृमोदत्तेन तृप्यंतु [illegible] यांतु परां गति अ

हे पितरः अत्र मादयध्वं अत्र पिंडे मदयुक्ता हर्षयुक्ताः भवत किंच यथाभागमावृ
भागं प्राप्य आवृषायध्वं ।१

यथाभागमा वृषायध्वं २ ग्निदग्धाश्चेति पौराणिकः स्त्रीशूद्रकर्तृकश्राद्धे येऽग्निदग्धेति विशेषस्तत्रातः अग्नि अमीमदंत पितरो यथाभागमावृषायिषत ३
दग्धेति निगदव्याख्यातं अत्र पितरो मादयध्वं वृषाऽइव बलिनो भवत स्वेछया पिंडोपभो
गार्थं पितृणां प्रार्थना इति वाक्यार्थः ते पितरः अमीमदंत अन्नेन पिंडेनैवेति शेषः तथा
च मदन्नेन पिंडेन हर्षयुक्ता जाता इत्यर्थः किंच आवृषायिषत मदन्ने पिंडे स्वं स्वं भागं प्राप्य वृ
षा इव बलिनो जाताः पूर्वमंत्रे प्रार्थना अस्मिन्मंत्रे सिद्धार्थकथनमिति भेदः नमो
व इति तर्पणे व्याख्यातं एतद्वः पितरो वासः हे पितरः वः युष्मभ्यमेतद्वास आच्छाद
नं दीयत इति शेषः ऊर्जं वहंतीति मा ख्यातं वाजे वाजे ऽवत वाजिनो धनेषु विप्रा
अमृता ऋतज्ञाः अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः वाजि
मन्त्र नः वाजमस्यास्तीति वाजी तथा च श्राद्धदन्नमन्नं पितृणामस्ति इति पितर एव वाजि
न उच्यंते हे वाजिनः पितरः यूयं अवत रक्षां कुरुत अस्माकं वाजे अन्ने अन्ने तथा

कुरुत वाजे

विप्राः विप्रमूर्त्तय। पुन किंभूता अमृता अमरधर्माणा पुन किंभूता ५

चयत्कृतमक्तं तंचान्नं श्राद्धार्थमुपकल्पितं तत्रसर्वत्र नकेवलं तत्र किंतुधनेष्वपि
सूर्यं किंभूता ऋतज्ञा सत्यज्ञानशालिनः रक्षिताच अस्यान्नस्यमध्वः मध्य निरस्मान्
पिबत यद्वारामसंबंधिनः मध्वः मधुनः रसं पिबत पीत्वाच मादयध्वं हृष्टाः सन्तः प
थिभिर्देवैर्निर्यातगच्छत केदेवयानैर्देवानां यानंयत्रतेइत्यर्थः अत्रहृष्टाः सन्तः
ने स्वर्गंगच्छतेतिवाक्यार्थः ॥ आमावाजस्यप्रसवोजगम्यादिमेद्यावापृथिवीविश्वरू
पे आमागंतांपितरामातराचामासोमो अमृतत्वेनगम्यात् वाजस्यान्नस्यप्रसवः फ
लंमामांआजगम्यात् आगच्छतु अस्मिन् श्राद्धे कृतस्यान्नदानस्यफलंमांपुनरागग श्रा॰वृ:
छत्वित्यर्थः किंच इमे द्यावापृथिवी द्यावापृथिव्यौ आजगम्येतां आगच्छेतां द्यावा २६
पृथिवी किंभूते विश्वरूपे विश्वंसर्वरूपंययोस्ते विश्वरूपे एतेन पृथिवीस्वर्गसंबं
धिकस्थानं मामागच्छेत्विति आशास्यते किंच हे पितरामातराच पितः मातः पुत्रं आ

पदा नदा

गंतां आगच्छंतां तथा च यदा अहं श्राद्धं करोमि तदा मातापितरौ आगच्छतामिति
प्रार्थना किंच पितॄणां राजा सोमः मां आगम्यात् आगच्छतु किमर्थं अमृतत्वेन
अमृतत्वाय मोक्षाय तथा चानेनानुज्ञानेन मम श्राद्धफलं पार्थिवसुखं स्वर्गश्च
भवतु श्राद्धसंमये मातापितरौ समागच्छतां मोक्षश्च भवत्विति आशंसा वाक्यार्थः
अथ सपिंडनमंत्रव्याख्यानं ये समानाः सुमनसः तेषां पितॄणां लोकः स्थानं
एतस्मै प्रेताय पित्रे स्वधा भवतु किंच नमो यज्ञः नमस्कारः कृतो यज्ञः देवेषु उरु
रवो माऽवा प्रभृतिषु कल्पतां ज्ञातो भवतु देवश्राद्धं भवत्विति यावत् तथा चा
नेन सपिंडनकर्मणा प्रेतस्य पितृलोकप्राप्तिः पार्वणश्राद्धाधिकारश्च भवति
ति वाक्यार्थः केषां केषां ये पितरः पितामहादयः समानाः सपिंडनेन समान
लोकं गताः अतएव समनसः समानहृदयाः यमराज्ये यमाधिकारे स्थिताः॥

पितरो यमराज्ये
तेषां लोकः स्व
धा नमो यज्ञो दे
वेषु कल्पतां॥

सुमनसं. जीवा जीवेषु मामका तेषां श्रीर्मयि कल्पतामस्मिन्लोके शतं समाः ॥१

ये समानाः तेषां प्रसादेन स्वाधाहार्य्यं तेन तेषां पितॄणां प्रसादेन मयि श्रीः ल
क्ष्मीः कल्पतां भवतु अस्मिन्लोके इह जन्मनीत्यर्थः कियंतं कालं शतं स
माः शतवर्षाणि तथा च तेन कर्मणा पितृप्रसादेन मम शतं वर्षाणि लक्ष्मीर्भ
वत्विति वाक्यार्थः ते के पितरः समानाः सुमनस इति पदद्वयं व्याख्यातं ये
जीवेषु स्वस्वशरीराधिष्ठानेन कर्ममार्गेषु मध्ये मत्संबंधिनो जीवाः स्वस्वशरी
रावच्छिन्नकर्मतो ममकारः तेऽत्र सपार्वणसमानं अथ द्वितीयमंत्रव्याख्या
अत्र यवोसि पितृदेवत्यः स्वधास्थाने वृद्ध्यादीनां मुखानिति विशेषः तथा च वृद्धा
नांदीमुखान् पितॄन् प्रीणयेति योजना अन्यत्सर्वं पार्वणसमानं अथ प्रा शिवः
चीनमंत्रव्याख्यानं कृणुष्व पाजः हे अग्ने पाजः बलं कृणुष्व कुरु पाजशब्देन २०
बलनाम सुपठितः किमिव प्रसितिं न पृथ्वीं पृथ्वीं प्रसितिं वा गुरामिव यथा
प्रसितिं न पृथ्वीं याहि राजेवामवां इभेन तृष्वीमनु प्रसितिं द्रूणानोस्तासि
वि[illegible] ॥

२ध्मेन२

कद्व

घुजालमिव नकारस्तत्प्रमाथीयः ततो याति अर्थात्तवनूच्यतीतिशेषः अंमवा
न् आमासवान् राजेव यथा आमवान् अ मत्स्यवान् त्वत्वाराजेव यात्रीसन्वयः
यथा गृहवान् त्वलु आमशशोष्टदर्वचनः केनेंद्रसंवेन बलेन यथा द्रुमेनदृक्षि
नागत्वा चानुपश्चात् दृष्टेत्वा क्षिप्रयाप्रमितिनिष्प्रसिसावागुरयाजालेन वा कु
णानः हिसन् अस्त्रासिद्धेशाभिरात्रणामितिशेषः अतोवदमीमित पिष्टैः लोत्रा
करैः प्रबाहैः रक्षसाः राक्षसान् विध्यताडय तवत्रमामांत्रमणाः वातोद्धूताः अ
र्घ्यातज्ज्वालासमूहाः पतंति इतस्ततो गच्छंति तैः तत्पूषिताप पित्हन् अर्थाद्दक्षा
ति अनुस्वशाश्रितिमृत्राज्वालासमूहाः किंत्वताः आश्रयाः आराम्भसवनाः त्वं कि
५ त्वतः धृताघ्रष्टेन ज्वालासमूहेन शोभवानः दीप्यमानः किंच पतंगावरशांमि
लक्ष्मीकृस असंहितः अनखंडितः सन् विश्वकसर्वतः उल्काश्चवेणसहउल्काः

क्रापुयापन्नत्व नुमरत्रांधवता शोमुचानः।। नपूर्व यं ... द्दांपनत्द्रान्स न्तिं तेनिसजे विश्वंगुल्काः।।

अतिरूपेन

हेत्रुक्षेपतव श्रमाप्र.५

विसृज हिपप तन्मनानि येषां तानि पतंगानि असंदिन इति दीर्घ खंडन इस्य
रूपं तथा वर ज्ञोनि याते ऊर्विर्त्यर्थः प्रतिस्प्रशो नः अस्माकं यः अघशंसः पाप
कीर्तनः उर्जनः अंतिअंतिके य अश्वरे तिष्ठति हे अग्ने तं प्रतिस्प्रशः प्राणाधीनबंध
नान् विसृज प्रेरय तृणितमो नव अतिशयेन तृणोनवा किंच अस्याः मदीयायाः
विशा जनपदजातेः पायुर्पालयिता नवा अदधं अनुपहिंस्यः एवं च अग्ने तेन

वि.१५ वमा किः माकश्चिद्बाधयिता शत्रूरादधर्षोधर्षको न वतु उदानेतिष्ठ हे अग्ने तनि
ष्ठकिंच प्रसात नुष अर्थात् ज्वालाः समद्दानूं दहेतिग्मदेते अमित्रान् शत्रून् निश्रो
षतान् निर्दह उषदा हे तिग्महे तिग्मातीक्ष्णा हेति ज्वाला आयुधं वा यस्य स तथो

क्तः किंच यः नः अस्मसंदानप्रहंतं चरातिअदानं चक्रे अशापादिनानिवार । शिवः २८
ति हे समिधान समिध्यमान तं नीचा नीचैः कृत्वा धक्षि दह अस्मीकरण कमिव

प्रसात नुषं न्यृमि ओं ।। उत्रो स रा दिग्मा हेते । योनो अराति समिधानं चक्रे नी चा
तं न्धक्ष्य तसं न शुष्कं ।।५

विसृजत्नृणी तमो न वो पा पुर्वि श्रो अस्मा अदधं । यो नो दूरे अघशंसो यो अंत्यग्ने माकिष्टे व्यथि रादधर्षी तू २

वीतर्

तिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ॥
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि
प्रमृणीहि शत्रून् ॥ १२

शुष्कमतसमिव दहन्निव नकार उपमार्थीयः अरातिमिति शदानइत्यस्य रूपं ऊर्ध्वो
भव प्र हे अग्ने ऊर्ध्वोन्नत ऊर्ध्वस्तिष्ठ स्थित्वा च अस्माः मम उपरिस्थितान् प्रति विध्य ता प्रति
डय किंच आविः कृणु ष्व दैव्यान्यग्ने दैव्यानि कर्माणि आविः कृणुष्व प्रका
शय किंच यातुजूनां यातुधानानां स्थिराणि कर्माणि अस्मान्निशारादीनि अव
तनुहि ऐमय तथा च यातुधानानां सर्वाण्येव स्थिराणि अवतनु किंच शत्रून् जामि
अजामिं अपुनरुक्तं पुनरुक्तं कृत्वा प्रमृणीहि पुनः पुनर्मारय ये सपत्नाः नामित्रादः पुनरुक्तवचनं उ
दीरतामंगिरसो नः इति तत्पूर्णे व्याख्यातं ये नः पूर्वे पितरः नः अस्माकं
ये पूर्वे पितरः सोम्यासः सोमयज्ञसंपादिनः सोमपीथं सोमपानं अनूहिरे
अनुप्रापितवंतः अर्थात् देवान् वहस्पापणो किं कृताः वसिष्ठाः वसिष्ठस्य बह
न्यपत्यानि वसिष्ठास्तेभिः तैः संरराणः संक्रीणायमानाः यमः हवींषि अनुम
सोम्यासो अनूहिरे सोमपीथं वसिष्ठाः ॥ तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्र
द्भिः प्रतिकाममत्तु ॥ १४

मनीषा त्वं रजिष्ठमनु नेषि पन्थां॥ तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः

दायत्वं यमः किंभूतः उशन् कामयमानः वश कान्तौ पितृभिः किंभूतैः उशद्भिः
कामयमानैः अत एव प्रतिकामं यथाकाममत्तु त्वं सोम प्रचिकितो॥
हे बुद्धिकितव हे सोम चिकित्वन् प्रकृष्टचैतन्ययुक्त त्वं मनीषया ज्ञानेन मनसः इच्छया तया बु
द्ध्या त्वं वसि यद्वा हे सोम त्वं प्रचिकितः प्रकृष्टज्ञातासि कितौ ज्ञाने कितौ
ज्ञाने या च ते ते मनीषा बुद्धिः तया रजिष्टं ऋजुतमं पंथां पंथानं देवयानाख्यं
अनुनेषि अनुगमयसि किंच तव प्रणीती प्रणयेन तवास्मनुज्ञानेन हे इन्दो नः
अस्माकं पितरः कर्मकर्तारो देवेषु मध्ये रत्नं रमणीयं यज्ञफलं अभजंत तत्कृतवंतः
पितरः किंभूताः धीराः धीरमंतः त्वया हि नः हे सोम यस्मात्त्वया आश्रय २५
भूतेन नः अस्माकं पूर्वे पूर्वजाः पितरः कर्माणि चक्रुः कृतवंतः हे पवमान पा
वनार्ह पावन हे सोम तस्मात्त्वामिदं प्रार्थं प्रार्थयेव वन्वन् भजमानः सन् अस्मदीया

पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः। वन्वन्नवातः परिधींरपोर्णु वीरे
भिरश्वैर्मघवा भवा नः ५

पितृभिः संविदानोऽनु द्यावापृथिवी आ ततंथ। तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम्॥४

नितानि तानि कर्माणीति शेषः परिधीन् यज्ञोपद्रवकारिणः अपोर्णु अपग
मय त्वं किंच ततः अवातः वाताः उपद्रवशून्यः एकचित्तं सन्नित्यर्थः वीरेति वी
रैरश्वैः [illegible] सह किंच नः अस्माकं मघवा त्वं मघं धनं देहीति यावत् यो यस्य
ददाति स तस्य धनवानित्यर्थः पितृ किंच ताः धीराः धीरमतः त्वं सोम यस्त्वं हे सोम ४
पृथिवी अत् पितृभिः संविदानः संवादं कुर्वाणः द्यावा ततंथ आ ततोषि तनु विस्तारे हे इं
दो तस्मै ते हविषा विधेम हविर्दद्मः वयं हविः प्रदानानंतरं रयीणां धनानां पतयः
स्याम तवेम सोमवतां पितृणां षड्चं वर्हिषदः पितर इति स्वकचो वर्हिषदां हे
पितरः वर्हिषि सीदंतीति वर्हिषदः ३ वर्हिषदः वर्हिर्यज्ञं वाजिनो वा ऊत्या गत्य अर्वाक् अर्वाच आगच्छतेति शेषः।
किमर्थं इमानि वो युष्माकं इमानि हवींषि वयं चकृम कृतवंतः तानि च आजु
सेवध्वं षध्वं सेवध्वं युष्माभिः अधस्तात् ना निषधमानि हवींषि सेवितानि ते यूयं उ नरपि आ

ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम्॥ त आगतावसा शंतमेनाथा नः शं
योररपो दधात॥४॥

पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ॥ बर्हिषदो ये स्वधया सुतस्य भजन्त पि-
त्वस्त इहागमिष्ठाः ॥४

हूयमाना आगच्छंतु शंतमेन सुखयितृतमेन अवसा अनेन हविर्लक्षणेन देवतु
पदे॰ तेन परितुष्टाः यज्ञं समाप्तुं काले अस्माकं शंयोः दधात शमनं रोगाणां यापनं च ए
तयानां शंय्योरिति पदद्वयमुक्तमित्थंवटः अस्मदपि यत्किंचिद्रयः अपापं
तदस्माकं दधात ॥ आ अहं पितॄन् अवित्सि अवेदिषं विदितवान् पितॄ-
न् किंभूतान् सुविदत्रान् कल्याणदायकान् विष्णोर्यज्ञस्य नपातं च विक्रमणं
च वेदितवान् अस्मिन् पातोऽस्मिन् गतानां न पातः यथा विविधं क्रमणं देवयानः
यत्र स विक्रमणः पितृयानः पंथा तत्र रहद्य टीवक्ष तदधरं प्राणिनो गच्छंति
पितृयाणेनाः तथा च देवयानेः पंथानो यज्ञसंबंधिनो अवेदिषं तज्ञामिनः पितॄन् अतो हमेवं शिवः
ब्रवीमि ये बर्हिषदः पितरः स्वधया अन्नेन सह सवनीयलक्षणेन सुतस्याभि- २०
षवकर्मणः पित्वः पानं सोमपानमिति यावत् तत् भजंते सेवंते तेऽत्र कर्म

सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ॥ त आगमन्तु त इह श्रुवन्त्वधिब्रुवन्तु ते
ऽवन्त्वस्मान् ॥५७॥

गच्छन्तु येषितरः सोपि

ति आगमन्निष्टाः ॥ उपहूताः पितरः सोम्यासः सोमसंबंधिनः बर्हिष्येषु नि
धिषु प्रियेषु हविर्भिर्बर्हिः हविर्विशेष निमित्तं उपहूताः आहूताः ते नः इह आग
मन्तु आगच्छन्तु बर्हिष्येषु बर्हिषि आसादितेषु बर्हिः ते वेषु वा निधिषु निहितेषु
प्रियेषु पितॄणां प्रीतिरुचितेषु आगत्य च ते इह श्रुवन्तु एवं नु मदीयानि वचां
सि श्रुत्वा चाधिब्रुवन्तु श्लाघंतां यद्वा पुत्रेषु पितॄणां यद्वक्तव्यं तत् वदन्तु किं
च ते अस्मान् अवन्तु रक्षंतु आयांतु नः ॥ इति व्याख्यातं सदः अग्निष्वात्ताः पितरः एहेह आ
इह एह एहेह अग्निष्वात्ताः पितरः इह आगच्छत आगत्य च सदः सदः प्रति सदत उ
पविशत ततः सुप्रणीतयः सुप्रणयनाः सुखोपविष्टाः संतः हवींषि अत्त तत्र य
त हवींषि किंभूतानि प्रयतानि प्रशस्तानि बर्हिषि सादितानि इति शेषः अथ अस्मा
सु नः सर्ववीरं रयिं धनं दधात ननिधत्त सर्ववीरा यस्मात् सर्वे वीराः ये अग्निष्वात्ता

गच्छत सदः सदः
सदत सुप्रणीत
यः ॥ अत्त हवीं
षि प्रयतानि
बर्हिष्यथार
यिं सर्ववी
रं दधातन ॥

तां मध्ये दिवः स्वधया मादयन्ते ॥ तेभ्यः स्वराडसुनीतिमेतां यथावशं तन्वं कल्पयाति ॥ १

ये पितरः अ

ये अग्निष्वात्ता अग्निष्वात्ताः अग्निना स्वादिताः ये च अनग्निष्वात्ताः श्मशानकर्मनप्राप्ताः मध्ये दिवः धुलोकस्य मध्ये स्वधया स्वकर्मफलोपभोगेन मादयन्ते तेभ्यः तेषां परमेश्वरः एतामसुनीतिं यमं सह यं कृत्वा तेषां पितॄणां शरीरं कल्पयति विदधाति सार्थः स्वराट् स्वेनैव राजत इति अहतैश्वर्यः असुनीतिः असून् प्राणान् नयतीति असुनीः

सुरत्तेर्वशेन यथाकामं यथा कामं यथाक(?) चित्तं शरीरं कल्पयाति कल्पयतु ॥ न यथा चेष्टा वर्तमान यथाकामस्य रः सहाय कृत्वा शिवः

हवामहे नाराशंसे सोमपीथं य आशुः ॥ ते नो विप्रासः सुहवा भवन्तु वयं स्याम पतयो रयीणाम्

तिर्यमः ॥ अग्निष्वात्तानृतुमतो हवामहे अग्निष्वात्तान् पितॄन् ऋतुमतः ऋतुसंयुक्तान् हवामहे आह्वयामः कान् इत्याह येनाराशंसे चमसे [illegible] सोमपीथं सोमपानं आशुः प्राशुः ॥ श्रुतिः चमसे पितॄणां नाराशंसः तस्मिन् तेषां नाराशंसेत्य[illegible] त्र ते च आहूयमानाः नः अस्माकं सुहवाः स्वाह्वा[illegible]नाः भवन्तु ते किंभूताः विप्रासः मेधाविनः एवं कृते रयीणां धनानां पतयः स्याम भवेम ॥ आच्या जानु

३१

हे विश्वे पितरः जानु अर्थात् सव्यं आच्य पातयित्वा दक्षिणतो निषद्य दक्षिणे दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे ॥ मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥ २

तोऽवस्थानं कृत्वा श्रूयेत ॥ ॥ स्वभावनिर्देशः पितॄणामेवं स्वभावाः पितरो भवं
ति अथैनं पितरः प्राचीनावीतिनः सव्यंजान्वाच्यासीदन्निति श्रुते इममस्मदीयं यज्ञं
याहं अभिगृणीत अभिष्टुवत दक्षिणामंत्रकालकर्तृद्रव्यविषयेण मानोत्कर्षैः साध
य यज्ञ इत्थं प्रकारेणेति शेषः । विश्वे सर्वे संभवंतो वृद्धिं प्रदोऽभिधाताश्चेत्यर्थः किं
च हे पितरः केनचिदपि नः अस्मान्मा हिंसिष्ट मा नाशयत यद्यपि वः युष्माकं
[illegible] पुरुषतया [illegible] कृतवंतः [illegible] मा हिंसि
[illegible] आगः अपराधं पुरुषता पुरुषतया हेतुभूत
या करामं कृतवंतः तथापि मा हिंसिष्टेत्यर्थः पुरुषाश्चलचित्ता भवंतीति भावः
आसीनासो हे पितरः ये यूयं अरुणीनां अरुणवर्णानां ऊ[illegible]र्णानां अर्थात्
कुतपा[illegible]नां उपस्थे मध्ये आसीना उपविष्टास्थ अरुणादिता ऊर्णा भवंति या
अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ॥ पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत त इहोर्जं दधात ॥२

६

तेषिमन्यसे रयिं नू ॥ तद्वो गोभिः श्रवाय्यं देवत्रा पनयायुजम् ॥ ५ ॥

लिः कृतपाः क्रियंते यद्वा अरुणवर्णानां सूर्यकिरणानां सूर्यस्येत्यर्थः ते यूयं
मर्त्याय मनुष्याय दाशुषे दत्तवते अर्थाद्धवींषि यजमानायेति यावत् रयिं धनं दत्थ किं
च तस्मै तेभ्यः पुत्रेभ्यः वस्वः वसूनि च यच्छत तु यजमानार्थं पुत्रग्रहणं तथा च श्रावका
रिभ्यः पुत्रेभ्यो वसु दत्तेत्यभिप्रायः किंच ते यूयं इहास्मदीये यज्ञे ऊर्जं अन्नं धनं
वा दधात स्थापयत श्यमनेकमश्ववादनं हे ऽश्वैकश्ववादन कर्मवदतीति कश्व
वाहन· येरथैरह विह्लक्षणं धनं त्वं चित् त्वमपि मन्यसे अवगच्छसि अनेन श्रेयः प्रामु
त्राकारतहत्पनेन प्रकारेणेति शेषः तद्धविर्लक्षणं रयिं नः अस्मदीयं स्वत्कृतं वाक्षि
पुरोनुवाक्या याज्या च षट्कारलक्षणाभिर्देवत्रा देवेभ्यः पनयद्देदिहविः किं ॥ शीवः रूर
भूतेश्रवाय्यं श्रवणीयं पुर्यथायुक्तं यथा योग्यमित्यर्थः पनतिर्दानकर्मा ऽयोश्र
ग्निः कव्यवाहन ॥ यः अग्निः कव्यवाहनः कव्यं पितृणामन्नं होता पितॄन्यैजत इष्ट
पितॄन्पदाद्दत्तावच्यं· प्रदेहव्यानि वाचति देवेभ्यः आवह ॥ १

कव्यवाहनो वाड्ढव्यानि सुरभीणि कृत्वी ॥ प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥ २

वा नूसद्दान्नीपुड्ढव्यानि सुरभीणि हव्यानि हवींषि देवेभ्यः पितृभ्यश्च प्रवोच
त्ति पुत्रवीति पितृन् किं भूतानि सदा स्वधः सस्वध पितृन् यजन्ते षोवा आकारः स
मुच्चयार्थः त्वमग्न ईडितः हे अग्ने कव्यवाहनयस्त्वं ईडितः या त्विवोढव्यानि हवीं मन्त्र २
षि सुरभीणि कृत्वा सुरभीणि कृत्वा ... चतानि हवींषि पितृभ्यः सुरभीणीति कृत्वी ४
प्रादाः दत्तवानसि ते चापितरः स्वधया पितृमन्त्रेण अक्षन् अन्नं खादितवन्तः
हे देव त्वमपि प्रयता प्रयतानि हवींषि अद्धि खादय ॥ ये चेह मादिना तर्प्पणे व्याख्या
ते इदं पितृभ्यो ऽस्त्विदं हविर्लक्षणम् अन्नं अद्य अद्यतनं तेभ्यः पितृभ्यः नमोस्तु ये पूर्वा
सः पूर्वे ईयुः अर्थात् स्वर्गं ययुः ये च परासः पराकृतहस्ताः अर्थात् सर्वं त्यक्त्वा ईयुः या ता
ये च पार्थिवे रजसि निषत्ताः पार्थिवं पृथिव्यां भवं रजः अग्निः तत्रासिसुखेन निष
ण्णाः अग्निलोकं प्राप्ता इत्यर्थः ये वा ये च नूनं निश्चयेन सुवृजनासु साधुवल्लतासु वि
नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ॥ ये पार्थिवे रजस्या निषत्ता ये वा नूनं सु
सुवृजनासु विक्षु ॥ ४

गर्भविशेष:४

श्रुतिमेव २ प २ हे

पैतर: पवमान: पुत्रा सोमं क्रत मा सुषाणा:॥ सुवीर्यस्य स्वस्ति सुक्तानाम: हामा मिन् हो अकृणीरयं वुक्त॥

पुयज्ञम ने पु निषत्ता ... निषद्यास: अध्याययान: अधीअयएवं सदितेअने यथान: पितर: पुविश्वविंद तएवकारार्थे तास्वरमेव दीधितिं अनु आगता: आमा हे सधितिं आदित्यरश्मिं आदित्यमंडलमितियावत् यत: एषदेवयान: पथा एवं अनेन हे स्वमादात्मसमाद्मांपृथ्वीलिंदं तवेदिवां द्युलपृथ्वावरादिखनने: यदा पृथिव्यांअवा कृ१.४ लोकांहिपशुधपादीनिलिंदं यज्ञेसर्वोपकरणानि अनुतिष्ठतइत्यर्थ: अरुणी: आ के चमाना: लोकतीरमीन् अर्थादासेस्य अपत्रनं अहेणुम: अपहत्यतमेवयंथा नमनुलिख्यै लिंबाकर्यार्थ: पितर: किंस्वता: पराम: उत्कृष्टा: प्रव्राम: पुराणा: इतमा त्रिवृ: २२
सुषाणा ऋतंचगंतरा सुषाणा: आसुवंतं उक्थशास: उक्थानियज्ञेयेशंसंतिते ने
क्थ शास: उक्थानस्य वेद्यैकादशमारख्यातं॥ इति श्रीमहोपाध्यायशत्रुघ्नकृतायां वेद
मंत्रार्थदीपिकायां आद्युमं त्रपंछेद:॥ अथषडंगशतसदीयं व्याख्यायते॥ सहस्रो

समसत्व४ दि उक्थ सामविशेष.३

माः सहछंदस आवृतः सहप्रमा ऋषयः सप्त दैव्याः पूर्वेषां पंथामनुदृश्य धीरा
अन्वालेभिरे रथ्यो न रश्मीन् अयं मंत्रः कांचित्कर्मसृष्टिप्रतिपादिका दृष्टा स
सप्तऋषयः तु रद्वाजकश्यपगौतमात्रिजमदग्निवसिष्ठविश्वामित्राः पूर्वेषां क
ल्पांतराधिकारिणां पंथां पंथानं अनुदृश्य अवलोक्य अन्वालेभिरे अन्वारेभिरे अन्वा
विक्षिप्तारंभंत स्वीकृतवंतः ऋषयः किंभूताः सहस्तोमाः स्तोमसहिताः का
रणास्तोमसहिताः सहछंदसः छंदसहिताः आवृताः सहावृतः आवृतेन कर्मौघ २२
नेष्ट वा सकलप्रधानानां कर्मणामनुष्ठातार इत्यर्थः सहप्रमाः प्रमाणं प्रमा प्रमा
ण परीक्षका इत्यर्थः दैव्याः प्रजापतित्वेन प्राणास्मिता निनः कथमिवान्वालेभिरे
रथ्यो न रश्मीन् रथे साधुः रथ्यः सारथिः नकार उपमार्थीयः न यथा सारथिः इष्टदे यथा
शप्रेष्वर्थे अश्वनियमनाय रश्मीन् आलभते एवं ते पि कारणानि सृष्टवंत इत्य

पैः ॥ अथ शिवसंकल्पव्याख्यानं ॥ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु तन्मे मनः मेमम शिव
संकल्पमस्तु शिवः संकल्पोऽभिलाषो यस्य तत् तत् किं यत् जाग्रतः पुरुषस्य दू
रं गच्छति नाना विषयेषु संचरतामिंद्रियाणां सहकारित्वेन ततस्ततः सर्वास्वादि
ति इंद्रियप्रसरणात् वा तत् मनः किं तत् तदेव स्वरूपं पुनः किं तत् ज्योतिषामिंद्रि
याणां एकं अद्वितीयमिंद्रियं मुख्यमित्यर्थः तदधीनत्वात् सर्वकार्याणामिति
तावः दूरंगमं इंद्रियाणां मध्ये दूरगं [illegible] दूत व्यवहितविषया साधारण
त्वादित्यर्थः येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वंति विदथेषु धीराः यद
पूर्वं यक्षमंतः प्रजानां तन्मे मनः शिवसंकल्पमस्तु येन मनसा अपसः अप
स्विनः कर्मणो मनीषिणः यज्ञेक कर्माणि कृण्वंति कुर्वंति अपस इति कर्मना

दूरंगमः
उद्धृतपयैस्वप्न
अदृष्टस्वप्नदर
नि स्वप्नविष
यत्वं प्रतिभव
ति ५

शिवः
३४

ममनीषिणः किंभूताः विदथेषु यज्ञेषु यज्ञसाधनेषु ज्ञानेषु वा धीराः पंडिताः
मनः किंभूतं अपूर्वं न विद्यते पूर्वं कारणं यस्य तत् मिसमर्थः अकृतं वा पुनः
किंभूतं यक्षं पूज्यं लोके वा प्रजानां अंतः अंतर्वर्ति तन्मन इति व्याख्यातं यस्य
ज्ञानमुत चेतो धृतिश्च यज्ज्योतिरंतरमृतं प्रजासु यस्मान्न ऋते किंचन कर्म क्रि
यते तन्मे मनः शिवसंकल्पमस्तु यन्मनः प्रज्ञानं प्रकृष्टं ज्ञानं यस्मात्तत् उत
समुच्चये यत् चेतः चिंते चेतना याः उपलब्धेर्हेतुः धृतिश्च यत् प्रजासु अंतर्हृदये
अमृतं यज्ज्योतिः सुखहेतूनां प्रकाशकं यस्मात् ऋते किंचन कर्म न क्रियते के
नापीति शेषः तन्मे मन[illegible]दितं येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन
सर्वं येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु येन इदं विद्यमा
नं भूतं अतीतं भविष्यत् भावि सर्वं भुवनं परिगृहीतं आक्रांतं येन किंभूतेन अ

हृतेन नित्येन सुखहेतुना वायेन चक्षमहोता अग्निष्टोमस्तायते तन्मे मनः शिव
संकल्पमस्तु यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः
यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु यस्मिन्नृचः ऋग्वे
दः साम सामवेदः यजूंषि यजुर्वेदः सर्वे प्रतिष्ठिताः आश्रिताः अत्र कइव रथ
नाभौ रथमध्ये अराइव यस्मिंश्च प्रजानां सर्वं चित्तं संज्ञानं ओतं संबद्धं तत् सु
खारथिरश्वानिव यन्मनुष्यान्नेनीयते भीषुभिर्वाजिन इव हृत्प्रतिष्ठं यदजिरं
जविष्ठं तन्मे मनः शिवसंकल्पमस्तु यन्मनः मनुष्यान्नेनीयते अहितविषयेषु प्र
वर्त्तयति च कइव सुखारथिः सुसारथिः अभीषुभिः रश्मिभिः अश्वानिव य शिवः
था उत्कृष्टसारथिः अश्वान् हिताहितविषयेषु प्रवर्त्तयति निवर्त्तयति च अश्वा २५
न् किंभूतान् वाजिनः वेगशालिनः मनः किंच तं हृत्प्रतिष्ठं हृदि प्रतिष्ठितं ॥

तत्रैव ज्ञानोत्पत्तेः यच्च अजरं नित्यं शौद्धं अविष्टं नवं शालिवेगवत् तन्मन इति अ
थ पुरुषसूक्तं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिं सर्वतः स्पृत्वा
अतिष्ठद्दशांगुलं पुरुष ईश्वरः दशांगुलं नाभेरूर्ध्वं अतिक्रम्य अर्थात् हृदयं इति
यावत् अतिष्ठत् स्थितो भवत् अर्थवशात् हृदयमोपरिज्ञानात्मक पुरुषरूपेण स
एवांतर्यामी कर्मफलोपभोजक इत्युच्यते किंभूत्वा भूमिं सर्वतः स्पृत्वा व्याप्य भूमि
शब्देन भूम्याद्यप्राणिदेहवचनः तेन सर्वभावेन त्रैलोक्यवर्तिनां पार्थिवदेहान्
व्याप्य स्थितः भूमिशब्दः पंचभूतोपलक्षक इति केचित् केचित्तु भूमिशब्देन आधा
रोपलक्षकः तेन तिर्यगधोव्यापक इत्यर्थः स कः ईश्वरः सहस्रशीर्षा सहस्रशब्दो
ऽसंख्यातवाचीनः तेनासंख्यातशिराः पुनः किंभूतः सहस्राक्षः अत्राक्षशब्दः ष
डुद्धीन्द्रियोपलक्षकः पुनः किंभूतः सहस्रपात् पदशब्देन कर्मेन्द्रियोपलक्षकः

तानिचपंच तथाच त्रैलोक्योदरेवर्त्तीनियानित्रिरासिवुद्धीन्द्रियाणिकर्मेन्द्रियाणिच
तानिसर्वाणि अस्यैवेत्यर्थः अत्रनाभेरूर्ध्वदशांगुलंअतिक्रम्यहृदयेसवतीतिस
कललोकंतुलवमिन्द्रमेवतत्रपुरुषस्तिष्ठतीत्यत्रश्रुतिःप्रमाणं कतमआत्मेत्युपक्र
म्ययोयंविज्ञानमयःपुरुषःप्राणेषुहृद्यंतर्ज्योतिरितिश्रुतिः एतौसुपर्णावितिच
यमोवैवस्वतोदेवोयस्तवैषहृदिस्थितइतिमनुवचनंप्रमाणं हत्वेतिष्ठःव्याया
मेऽस्यस्माद्ग्रातोस्कान्दस्येरूपंसर्वतः वृत्वेतिकस्कादित्वाद्विसर्जनीयस्येसः अ
त्रब्रह्मांडोदरंव्याप्यब्रह्मांडोपरिदशांगुलंअतिक्रम्यातिष्ठत् दशांगुलमित्युप
लक्षणंब्रह्मांडाद्बहिरप्यव्याप्यादित्यर्थः इतिशंकराचार्यटीका पुरुषएवेदं शिवः ३६
सर्वंयद्भूतंयच्चभाव्यंउतामृतत्वस्येशानोयदन्नेनातिरोहति २ इदंयत्किंचिद्व
र्त्तमानकालीनंयद्भूतंयदतीतकालीनंयच्चभाव्यंभविष्यत्कालीनंतत्सर्वंपुरु

षएवतथाचवर्त्तमानभूतभविष्यत्कालस्वरूपोभगवानधिकृतस्तूयइतिदर्शितं।
उतकिंचनकेवलमेवकिंतुयदन्नेनअदनीयेनभक्तादिनाअतिरोहतिअतिशये
नजन्मस्थितिंचलभतेतत्सर्वंपुरुषएव तथाचयेजंगमाः भक्ष्याद्याहारेणजन्मस्थि
तिंचलभतेयेचस्थावराःवृक्षशैलादयोजलतर्पणरूपेणाहारेणजन्मलभंतेसर्व
एवब्रह्मादिस्तंबपर्यंताःपुरुषरूपाइत्यर्थः यद्वावर्त्तमानकालीनायद्वस्तुजातं
तत्सर्वंपरमेश्वरएव किंचयदन्नेनातिरोहतितेषांअमृतत्वस्यमोक्षस्यईशाःस्व
त्वयः" एतावानस्यमहिमातोज्यायांश्चपूरुषः पादोस्यविश्वाभूतानित्रिपादस्या
मृतंदिवि ३ :अस्यपुरुषस्यएतावान्महिमायत्सर्वंकंडिकोक्तसर्वदेशकाल
व्यापित्वसंसारापवर्गप्रभुत्वंनाम। अतोस्मात्कारणात्पुरुषःज्यायान्ज्येष्ठःपु
रुषोत्तमः किंच अस्यएकपादः विश्वाभूतानिविश्वानिचराचरात्म

कानिसर्वाणिभूतानि अपरंचत्रिपात् पादत्रयं अस्यपुरुषस्य दिविस्वर्ग आकाशे
वापादत्रयं ऋग्यजुःसामात्मकं अर्थात्सूर्यरूपं त्रयीमयत्वात् तस्यपादत्रयं किं
भूतं अमृतं मोक्षद्वारं सूर्यमंडलभेदद्वारेण गच्छतां मुमुक्षूणां परमात्मनि लया
पुरं त्मोक्ष इत्यर्थः यद्वा त्रिपाद्विज्ञानघनानंदरूपं दिवि द्योतने स्वमहिम्नि स्वर्गे वा
तिष्ठती[illegible]त्यर्थः ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ततो विष्वङ्व्या
मत्साशनानशने अभि ४ अस्य चतुष्पा[illegible]रणपुरुषस्य योसौ त्रिपात् पादत्रयात्म
कः ऋग्यजुःसामलक्षणो भगवानादित्यः सोस्युदैत् उदितः किंभूतः ऊर्ध्वं दिविस्थः
यद्वा कर्मबंधनिबंधनानां स्थावरजंगमादीनामुपरिस्थित इत्यर्थः किंवास्य चतु त्रिपु:
ष्पात्म[illegible]णस्य पुरुषस्य चतुर्थांशः हिरण्यगर्भतया इह जगति अभवत् प्रथमं ३१
सत्तामात्रेणावस्थानमकरोत् इत्यर्थः जगति किंभूते साशनानशने लोकरि

अलोकश्चियेषांचसृष्टतङः कृतेअधिकारस्तेलोकाः ब्राह्मणादयः येषा
मनधिकारस्तेऽलोकाः कृमिकीटादयः तदेवं कर्माधिकारिणि अनाधिका
रिणिचसर्वत्रजगति अपरः पादः सत्तामात्रेण तिष्ठतीत्यर्थः ततः पुनस्तदं सर्वेशासीराति
नरं सर्वतः विष्वक् व्यक्रामत् व्याप्तवान् आप्याविष्यानमकरोदित्यर्थः यद्याप
यमजगतिसत्तामात्रेणाभवत् ततः विष्वक् सर्वतः साशनानशनेलोकारमतो
क्रांस्वव्यक्रामत् व्याप्तवान् अत्रविश्वशब्दाद्वंवुगेता विसस्यप्रद्यातो · क्विपि वि
षड्ङ्ः तिरूपं अतिशाद्देनमवदितेनो दैवीत्यन्वयः ततो विराडजायत विरा
जो धिपूरुषः सजातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः ५ ततः पुरुषात्तदि
रण्यगर्भात् विराट्ब्रह्माण्जायतः तस्माद्विराजः ब्रह्मणः पुरस्तोमनुरधजाय
तमनुर्जातः मनुभगेग्रेपश्चादपित्तभिं अत्यरिच्यत तस्मोसक्रोऽभवत् त्वमि

पदंदेशोपलक्षणार्थंपुरःपश्चादितिकालोपलक्षकंतेनक्वचिदपिदेशेका
लेवातस्यमनोऽपुत्रपौत्रादिसंबंधितिःसदृशोनास्तीत्यभिप्रायः तस्माद्यज्ञा
त्सर्वहुतःसंभृतंपृषदाज्यंपशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये तस्मात्स
र्वौकसर्वव्यापकात्पुरुषस्यचतुर्थपादात्सर्वहुतःसर्वैर्हूयमानात्यज्ञस्व
·रूपात्पृषदाज्यंहविःसंभृतंसमुत्पन्नंतत्पृषदाज्यंतान्पशून्चक्रेचकार·
तान्कान्येआरण्याग्राम्याश्चआरण्याहरिणादयःग्राम्याश्चछागादयःता
न्किंभूतान्वायव्यान्वायुदेवत्यान् तस्माद्यज्ञात्सर्वहुतःऋचःसामानि
जज्ञिरेछंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ७ तस्मात्सर्वहुतःस
वैर्हूयमानात्यज्ञात्यज्ञपुरुषात्ऋचंऋग्वेदःसामानिसामवेदाःजज्ञिरे
जाताःतस्मादेवछंदांसिगायत्रीप्रभृतीनिजज्ञिरेजातानितस्मादेवयजुःय

शिवः
३८

जुर्वेद अजायत इत्यर्थः॥ तस्मादश्वा अजायंत ये के चोभयादतः गावो ह जज्ञि
रे तस्मात्तस्माज्जाता अजावयः ८ तस्माद्यज्ञात्सर्वयज्ञस्वरूपात् अश्वा अजा
यंत न केवलमश्वाः किंतु ये के चोभयतोदंताः पशवः तेप्यजायत जाताः त अस्मादय २
स्मादेव गावः जज्ञिरे जाताः तस्मादेव अजा अवयश्च जाताः अजाश्छागा अवयो
मेषाः उभयादतः इति अन्येष्वपि द्रष्टव्यत इति गावो ह हकारः समुच्चये अत्र
काण्डिकत्रये यत्किंचिद्विविरात्मकं विध्यर्थवादमंत्राश्रया वेदाः पुरुषोत्तमात् पुरु
षमेधयज्ञस्वरूपात् एव सर्वं जातमिति वाक्यार्थः॥ तं यज्ञं बर्हिषि प्रौक्षन् पु
रुषं जातमग्रतः तेन देवा अयजंत साध्या ऋषयश्च ये ९ तं पुरुषं यज्ञं यज्ञसा
धनं तं बर्हिषि अस्थापयन् देवाः ब्रह्माप्रभृतयः साध्याः साध्यनामानः गणदेवता
ऋषयो मरीचिप्रभृतयः प्रौक्षन् प्रोक्षितवंतः किंभूतं अग्रतः प्रथमतः जातं न

साधन

स्मात्तदानीमन्यहविर्भावे स्वयमेव द्विरासीदित्यर्थः नकेवले प्रोक्षणं किं
तु तेन पुरुषेण यज्ञेन यज्ञं ते देवाः अयजन्त यागं कृतवंतः अत्र कारणे कार्य्यो
पचारात् यज्ञेन यज्ञसाधनमभिधीयते प्रोक्षणग्रहणं सकलसंस्कारोपलक्ष
णार्थं तथा च पुरुषं पशुदाज्यादिरूपेण देवादयो यागं कृतवंतः इति वाक्यार्थः

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासीत् किं बाहू किमूरू पा
दा उच्येते १० अत्र सर्वे प्रश्नाः एवकारेणानुषंजनीयाः तेन देवादयः यत्य
पुरुषं व्यदधुः विहितवंतः तं कतिधा कतिप्रकारैर्व्यकल्पयन् विकल्पितवंतः शिवः
विकल्पनप्रकारमाह मुखं किमस्यासीदित्यादि अस्य पुरुषस्य किं मुखमासी ३९
त् किं बभूव किं बाहू किमूरू किंपादाः पादौ किमुच्येते इति ब्राह्मणोऽस्य मुख
मासीद्बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ११ प्र

र्वेकोऽपिकार्योविकल्पःकृतः आकांक्षोत्थापनाय अत्रश्रुतिमाह अस्यपु
रुषस्यमुखंब्राह्मणःआसीत्तब्र त्वबाहूराजन्यःक्षत्रियःकृतःअर्थात्तदीश्व
रेणैवअस्यऊरूतद्वैश्यःकृतःएतेनब्राह्मणादयःमुखादिभ्योजाताइति
बोद्धव्यंअथेतथादर्शनात् पद्भ्यांशूद्रःअजायत अयमेवब्राह्मणादिच
तुष्टयरूपइतिवाक्यार्थः चंद्रमामनसोजातश्चक्षोःसूर्योअजायतश्रोत्राद्वा
युश्चप्राणश्चमुखादग्निरजायत १२ अस्यपुरुषस्यमनसःसकाशात्चंद्रमा
अजायतचक्षोश्चक्षुषःसूर्यअजायतजातः अत्रत्वचिंत्यमहिम्निपुरुषेमन
श्चक्षुःश्रोत्रेभ्यःचंद्रमाप्रभृतीनांउत्पत्तिःक्रमःइतिवैपरीत्यकथनंश्रुतिरिति
पुरुषश्रुतिरेववाक्यार्थः नाभ्याआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्त्तत पद्भ्यां
भूमिर्दिशःश्रोत्रात्तथालोकांअकल्पयन् १३ नाभ्यानाभितःअंतरिक्षमाका
शमाह पुः चप्राणश्च [illegible] अजायत मुखात् [illegible] अग्निरजायत अन्यत्र चंद्र [illegible] वायु
[illegible] मनसश्चंद्र श्रोत्रात् [illegible] नां उत्पत्तिक्रम [illegible] ४
[illegible]

समवर्ततसम भवत् । पद्भ्यां पादद्वयात् भूमिः समवर्तत । श्रोत्रात् कर्णात्
दिशः समवर्तत ॥ तथा सर्व पुरुषः लोकान् देवमनुष्यादि ॥२॥

शिं बभूव शीर्ष्णः मस्तकात् द्यौः स्वर्गः निखिलस्या वरजंगमादि त्रैलोक्यं अकल्प
अकल्पत यन् सृष्टवान् यत्पुरुषेण हविषा देवा यज्ञमतन्वत वसंतो अस्यासीदाज्यं ग्रीष्म इ
ध्मः शरद्धविः १४ पुरुषेण हविषा हविर्द्रव्येण देवा यत् यज्ञं अतन्वत कृतव
न्तः देवाः उपलक्षणं साध्या ऋषयश्च अस्य वसंतः ऋतुविशेष आज्यं घृतमासी
त् बभूव ग्रीष्मः इध्मः समिद्विशेषः आसीत् शरत् हविः योग्यता वशात् आज्या
तिरिक्तं हविः पुरोडाशादि सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृता देवा यद्य घ
ज्ञं तन्वाना अबध्नन्पुरुषं पशुं १५ अस्य यज्ञस्य परिधयः तृप्ति वेष्ट नानि स ४०
प्त अर्थात् समुद्राः आसन् बभूवुः त्रिसप्त एकविंशति समिधः कृताः सप्तछंदां
सि सप्त व्याहृतयश्च एतानि समिधः कृताः इत्यर्थः अस्य कस्य यत् यज्ञं तन्वानाः उ
र्वाणा देवा पशुं पशुस्थानं पुरुषं अबध्नन् बध्नन्तः अत्र सप्तेति संख्यामात्रं सू
सप्त उपलक्षणं इति

यतेनतुसंख्येयंतत्रसंख्येयेकल्प्यमानेयज्ञस्त्वमिवष्टकंकल्पनीयंयज्ञस्यग्नि
ष्वलारतवर्ष।तद्वेष्टकाष्वलनवर्णार्णवषष्टतयःसप्तसमुद्राएवंसंभवंतित्रिः
सप्तइध्मस्तत्रापिसंख्येयकल्पनायांछंदांसिजज्ञिरेतस्मादित्यत्रयज्ञसाधनत्वेनेष्टौ
एकविंशतिछंदसामुक्तत्वात्तेषामेवग्रहणं यज्ञेनयज्ञमयजंतदेवास्तानि
धर्माणिप्रथमान्यासन् तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः
१६ देवाइंद्रादयःयज्ञेनयज्ञसाधनत्वेतेनपुरुषेणपश्वादित्वेनयज्ञंय
ज्ञपुरुषंपुरुषोत्तमंअयजंतपूजितवंतःअत्रहृष्टंपुरुषंपशुंकृत्वाहिंसात्मके
नकर्मणायज्ञःकृयतइत्याहतानिधर्माणिप्रथमान्यासन् तथाचतेधर्माःप्र
थमाएवानूअन्यत्रतद्दर्शनमसंतावितमेवेत्यर्थः अतएवतेदेवाएवंरूपेणे
वयज्ञेनेष्ट्वानाकंस्वर्गं सचंतःसंगताःयत्रनाकेपूर्वेसाध्यादयोदेवाःमहि

मानः महात्मानः संति नेदनाकमित्यत्र ह्रकारः छांदसः स्तोलः स्वंत इत्यत्र च
समवाये इत्यस्माल्लङ् प्रथमपुरुषैकवचने नेच्छंदस्याङ्योगेपीत्याडागमनिषेधः॥
अथोत्तरनारायणं अद्भ्यः संभृतं पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे तस्य व
त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे १७ त्वष्टा आदित्यः अद्भ्यः ज
लात् पृथिव्यै पृथिव्या अपि अग्रे संभृतः संबद्धः अत्र पृथिवीपदं पंचभूतोप
पंच लक्षणार्थं तेभ्यस्तोत्पत्तेः पूर्वकाल एव संभृत इति वाक्यार्थः न केवलं पंचभू
तेभ्यः एव पूर्वं संभृतः किंतु विश्वकर्मणो ब्रह्मणो जलेस्य रसात् इच्छातोपि प्रथ त्रिवः
मं समवर्त्तत यदा विश्वकर्मणो जगन्निर्माणेच्छा नात्तत्रदेव समवर्त्ततेत्यर्थः त ५१
स्मात्तस्यादित्यस्य तद्रूपं मंडलाकारं मर्त्यस्य मनुष्याणां सृष्टितोपि अग्रे पूर्वं देव
त्वं विदधत् धारयत् एति एति निर्मनुष्यः समेति समागच्छतीति आजानं अतिशा

येनज्ञातवान् वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तात् तमे
वविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेयनाय १८ अहमेतंपुरुषंवेद
जानामिअस्मदादीनांसर्वेषामयमनुभवसिद्धइत्यर्थः यथाआदित्यः[illegible]
प्रकाशः परानपिप्रकाशयति तथायमपिस्वप्रकाशब्रह्मरूपोजगत्अ
पिप्रकाशयति तमसःपरस्तात् अविद्यमानात्मकसंसारात्पारमुत्तीर्णमि
त्यर्थः तमेवपुरुषमेवादित्यरूपंज्ञात्वामृत्युमतिक्रम्यएतिगच्छति अपुन
रावृत्तये नान्यइति अयनायमृत्युमतिक्रम्यगमनाय अर्थान्मोक्षाय अ
न्यःपंथानविद्यते तथाचायमेवपुरुषोध्यानगम्योज्ञातोमोक्षंददातीति
वाक्यार्थः प्रजापतिश्चरतिगर्भेअंतरजायमानोबहुधाविजायते तस्य
योनिंपरिपश्यंतिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा १९ योदेवेभ्यआ

व्याज्ञाप नार्थी। अपतीति श्रीः धनदानं॥ अहश्चा स्तुरुषोसो कानां मा अपत्नी ये लक्ष्मी धने। अहश्चा स्तुरुषः सर्वलोकस्य लक्ष्मादर्शनीयो भवति। लक्ष्मी दर्शनो कपोले स्य स्वरूपं। श्री [illegible] सत्यानां॥ स्वरूपं। अहोरात्रे पार्श्वेत [illegible]

तपतिर्यो देवानां पुरोहितः पूर्वोयो देवेभ्यो जातो नमो रुच्याय ब्राह्मये २० रुचं ब्राह्मं जनयंतो देवा अग्रे तदब्रुवन् यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे २१ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं इष्टं मनिषाण मुं मनिषाण सर्वलोकं मनिषाण २२ तेजस्स इति शिरश्चायेव ष

रु प्रजापतिः प्रजानां पतिः पुरुष एव सत्यरूपं अंतश्चरति अर्थात्तत्राणिनां देहमध्ये जीवात्मकरूपतया वसतीत्यर्थः एतेन धर्मार्थकामात्मनः संसारः सोहश्च श्रीपरमेश्वरपार्श्वद्वयमित्युक्तं भवति नक्षत्राणि रूपं तारागणो मूर्तिरित्यर्थः अश्विनौ द्यावापृथिव्यौ व्यात्तं विवृतं मुखमित्यर्थः इमेही त्वं सर्वं च प्रभुतामिति एवंभूतं त्वां पुरुषोत्तमं याचे [illegible] इष्टं तं सकामं इष्टाणामपि अनुगृहाण निजोपासकं सर्वमनुगृहाण इत्यर्थः किंच मम

तथा श्रुतिः

पतिः॥ लक्ष्मीदर्शनो अरात्रे स्मृत व पार्श्वेद्वय। पुरुषोत्तमः कायः परपुरुषपरः तस्य लक्ष्मी धात्मकत्वेन प्रकाशरूपत्वात् रात्रिरूपाद्यः संसारपरः तस्य लिङ्गं शिवः कैलासनाथ ४२ काश रूपत्वात्॥ पु

मत्रामुं लोकं स्वर्यां पुत्रलोकादिकं इषाणेन केवलममुं किंतु मेमं सर्वलोकं
स्वरादि सर्वलोकं इषाण्यायं वाक्यार्थः यः कश्चित्स्वर्गपुत्रादिकामयमानो ने
न सहस्रशीर्षाध्यायेन त्वां स्तौति पूजयत्युपतिष्ठते तं मनुष्यदानेन मामपि पशु-
पुत्रादि धनं युक्तमिह लोकं स्वर्गमोक्षादिकमिच्छतं वांछामात्रेण संपद्यते
समेत्वादित्यभिप्रायः अत्र तस्कृति पूर्वपार्थनामर्हतीति कृत्वा प्रार्थना
२२ अथाप्रतिरथं तं कवच आशुः शिशानो वृषभो न भीमो घनाघनः
क्षोभणश्चर्षणीनां संक्रंदनोनिमिष एकवीरः शतं सेना अजयत्साकमिं
द्रः १ इंद्रं स्तौति शतं वक्षीः सेनासाकं सहैव एकदैवाजयत् जितवान् इं
द्रः किंभूतः आशुः शीघ्रः शिशानः शातनकर्त्ता शातनं करणे वृषभो न भी
मः नकार उपमार्थीयः वृषभ इव भीमः विभेत्यस्मादिति भीमः भयानकः

अनिमिषेण
एकवीरेन।
अप्रमादिना
जिष्णुनापशी
लेन पुत्क्रारेण
सप्रहारकरि
ण ४

घनाघनः घ्नन्हन्तीत्येवं वृक्ता यद्वा [illegible] घन शत्रुरीरः शुनःकिंस्तः वर्ष
णीनां मनुष्याणां शीलस्त्राचालकः संक्रन्दनः संग्रामकारिणां समाक्रान्ता अनि
मिषु अप्रमादी अर्थाद्दवः यद्वा अनिमिषो देवः एकवीरः विक्रान्तः संक्रन्द
नेनानिमिषेण जिष्णुनायुत्करेण दुश्च्यावनेन धृष्णुना तदिंद्रेण जयतेत्सदधं त
युधोनरः इषुहस्तेन हस्ता तदिंद्रेण महद्युणा विशिष्टेनेंद्रेण तत्सैन्यं जितमि
ति शेषः हे नरः मनुष्याः हे युधः हे योधाः तत्सदधं तद्वा जयता सि लवत्युधं
श... द्रकारिणा दुश्च्यावनेन अप्रच्युत स्वभावेन धृष्णुना प्रहसनशीलेन ष्ठु शिवः ४३
नः किं इषुहस्तेन बाणपाणिना वृष्णा वर्षणशीलेन यद्वा इंद्रेण तत् जितमिति
योजना सइषुहस्तैः सनिषंगिभिर्वशी संस्रष्टा सयुध इन्द्रो गणेन संसृ
ष्टजित्सोमपा बाहुशर्द्ध्युग्रधन्वा प्रतिहिताभिरस्ता ३ स इंद्रः इषुहस्तैः यो

सप्रहारइत्यस्यार्थे पयुधर मी की दृश्यानद्रेण स[illegible] क्रन्दनेन ५

भृत्तिः संस्रष्टा संसृजति मिलति स एवं जो निषंगिभिः षड्गभिः संसृजति सः किं
भूतः वशीकांतः सर्वजनप्रियः स्वतंत्रो वा निगृहीतारिषड्वर्गो वा ईश्वरो वा सं
प्रयुधः योधून् स्वान् गणेन शत्रुगणेन संसृज्य संसृष्टजित् शत्रून् जयति संसृष्ट संस्रष्टा २
जित् पुनः किंभूतः सोमपाः पुनः किं बाहुशर्द्धी बाहुबलः निरपेक्षः शर्द्ध इ
ति बलनाम उग्रधन्वा उद्यतधनुः पुनः किंभूतः प्रतिहिताभिरस्ता शत्रुशरीरे
प्रतिहिताभिः इषुभिः अस्ता क्षिप्ता शत्रूणामेव एतेन लघुसंधानमुक्तं बृ
हस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः प्रभंजन् सेनाः प्रमृणो युधा
जयन्नस्माकमेध्यविता रथानां ४ इंद्रपुरोहितत्वेन बृहस्पतिः यते हे बृहस्प स्तू
ते रथेन परिदीय गच्छत्वं किंभूतः रक्षोहा किं कुर्वन् अमित्रान् शत्रून् अपबाधमा
नः पीडयन् किंच सेनाः शत्रुसेनाः प्रभंजन् मर्दयन् प्रमृणः प्रमर्दकान्

परि २

युधाजयन्नस्माकं रथानामविता गोष्वाएधि तव बलविज्ञाय स्थविरः प्रवीरः
सहस्वान्वाजी सहमान उग्रः अभिवीरो अभिसत्वा सहोजा जैत्रमिंद्र रथमाति
ष्ठ गो विद्‌ ५ हे इंद्र सत्वं जेतारं रथं आतिष्ठ त्वं किंभूतः गोत्रवित् स्तुतिवित्
ज्ञुनः किंभूतः बलविज्ञायः बलेन ज्ञायते प्रसिद्धः बलविज्ञेयः स्थविरः सर्वानु
शासकः सर्वमान्यो वा चिरंतनो वा प्रवीरः सहस्वान् बलवान्वाजी वाजवा प्रकृष्टो वीरः ५
न्वाजमन्नं सहमानः उग्रश्च तीक्ष्णः अभिवीरः वीरं अभिलक्षीकृत्य गच्छत्य
भिवीरः अभिसत्वा सहोजाः सह इति बलनाम बलेन जातः न त्वन्यस्माज्जातः ए
तादृशः सति गोत्रभिदं गोविदं वज्रबाहुं जयंतं अज्म प्रमृणंतमोजसा इमं स
सजाता अनुवीरयध्वमिंद्रं सखायो अनु सं रभध्वं ६ हे सजाताः समा
नजन्मनो देवा इमं इंद्रं अनुवीरयध्वं वीरकर्म कुर्वाणं वीरकर्मणे वानुग

सत्वीमद ६

सत्वसमगम्भूमि तिष्ठत्रिभूमि मता ४

शिवः ४४

म्यघोन्मा दृयत हे सखायः सखिभूताः एनं अनु संरभध्वं अनुगम्य संरंभं कुरुत एनं
किंभूतं गोत्रभिदं असुरगोत्रभिदं मेघभिदं ह्यर्थे भिन त्रिगोविदं अपालङ्कार
भवा वाख्विदं पंडितं वज्रबाहुं वज्रपाणिं जयंतं अज्म अज्म संग्रामं जयंतं ओजसा
बलेन प्रमृणंतं मर्दयंतं अर्थात् अज्ममेव अज्म संग्रामः अभि गोत्राणि सहसा
गाहमानो ऽदयो वीरः शतमन्युरिंद्रः दुश्च्यवनः पृतनाषाडयुध्यो ऽस्माकं सेना अ
वतु प्रयुत्सु ७ इंद्रः अस्माकं सेनाः प्रयुत्सु प्रकृष्टयुद्धेषु अवतु रक्षतु इंद्रः कि
भूतः गोत्राणि असुरकुलानि मेघवृंदानि वा सहसा बलेन अभिगाहमानः आ
क्रामन् अदयो निस्त्रासः वीरः विक्रांतः शतमन्युः बहुक्रोधः शतयज्ञो वा दु
श्च्यवनः अचाल्यं पृतनाषाट् पृतनां सेनां सहते अभिभवति अयुध्यः युध्य मा
नं प्रतियोधः इंद्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः देवसे

लेपभक्षोनवन

कूहरचनामां

नानां भंजतीनां जयंतीनां मरुतो यंत्वग्रं ८ आसां देवसेनानां इंद्रः नेता भव
तु बृहस्पतिश्च नेता भवतु मंत्रिप्रणीतानि कार्याणि राजा करोतीत्यभिप्रायः दक्षि
णा दक्षिणस्यां दिशि यज्ञः एतु सोमः पुरः पुरस्तात् एतु आगच्छतु यद्वा दक्षिणीय
ज्ञः सोमः पुरः एतु सेनानां किंभूतानां अभिभंजतीनां शत्रूनिति शेषः जयंतीनां ता
नेव किंच मरुतः गणाः भूतानां अग्रं निरुंधंतीति शेषः यंतु गच्छंतु इंद्रस्य वृष्णो वरुणस्य
राज्ञ आदित्यानां मरुतां च शर्ध उग्रं महामनसां भुवनच्यवानां घोषो देवानां जय
तामुदस्थात् ९ इंद्रः वर्षितुः इंद्रस्य राज्ञः वरुणस्य आदित्यानां मरुतां च शर्द्धः शिवः
बलं हस्त्यश्वरथपदातिलक्षणं उदस्थात् उद्भवत् शर्द्धः किंभूतं उग्रं भूर्णि ४५
युधां अग्र्यानंतरमेव देवानां घोषः उदस्थात् देवानां किंभूतानां जयतां जय
शालिनां महामनसां उत्कृष्टचित्तानां भुवनच्यवा नां भुवनच्यवनसमर्था

नांजितंजितमितितेषांशाद्दउक्तमित्यर्थः उद्ध षियमघवन्नायुधान्युत्
सत्वनांमामकानांमनांसि उद्वृत्रहन् वाजिनांवाजिनान्युद्रथानांजयतां
यंतुघोषाः १० हेमघवन्आयुधानिउद्धर्षयउत्तद्हर्षाणिकुरुउत्तास
ये तियावत् किंच सत्वनांसत्वानांमनुष्याणांमामकानांचमनांसिउद्धर्ष
य किंच हेवृत्रहन् वाजिनामश्वानांवाजिनानिवलानि उद्धर्षय किंच त्वत्प्रसा
दाज्जयतांरथानांघोषाःउद्यंतुउद्गच्छंतु अस्माकमिंद्रःसमृतेषुध्वजेषुअस्मा
कंयाइषवस्ताजयंतु अस्माकंवीराउत्तरेभवंत्वस्मानुदेवाअवताहवेषु
११ अस्माकंध्वजेषुइंद्रःरक्षिताभवत्वितिशेषः ध्वजेषुकिंभूतेषुसमृतेषु सगतेषु
अर्थात्शक्रचापध्वजसंगतेष्वित्यर्थः किंच इंद्रप्रसादादेवास्माकंयाइषवस्ताः
जयंतु अस्माकंवीराउत्तरेविजयिनोभवंतु किंचास्मान् उदेवाअवताहवेषु

उ एवकारार्थः अस्मानेवाद्वेषु आक्रामेषु संग्रामेषु अवतरद्यत अमीषां
चित्तम्प्रतिलोभयंती गृहाणांगान्यप्वे परेहि अभिप्रेहि निर्दह हृत्सु शोकैरं
धेनामित्रास्तमसा सचंताम् १२ हे अप्वे मायेअमीषां शत्रुबलसंबंधिनां
मनुष्याणां चित्तं चित्तानि प्रतिलोभयंती मोहयंती लुं लविमोहने शत्रूणां
अंगानि गृहाण ततः परेहि परतस्तान पि गच्छ मुगृहीतुं गच्छ ततश्च अभिप्रेहि
तानेव शत्रून्प्रकर्षेण एहि पुनः पुनरित्यर्थः हृत्सु शोकैर्निर्दह तेषां हृदया ऋ ३व.४
नि दहेत्यर्थः किंच त्वत्प्रसादादंधेन तमसा अमित्राः सचंतां अंधेन तमसा अज्ञा शिवः
नेनलक्षणेन अवसृष्टा परापत शरव्ये ब्रह्मसंशिते गच्छामित्रान्प्रपद्य मामी संस्कृत ध्द
षां कं चनोच्छिषः १३ हे इषो अवसृष्टा निक्षिप्ता सती परापत निपतता गच्छ स्व २
गच्छेति पुनरुपादानं त्वरार्थं। गत्वा च अमित्रान्प्रपद्यस्व प्रपन्ना त्वं ततः

३पुस्त्रा.२

मीषांशत्रूणांमध्येकंचनमात्रुच्छिषःमाअवशेषयशत्रून्[illegible]मूलान्कुर्वि
त्यर्थः किंभूतेशरव्येशरमयेब्रह्मसंशितेब्रह्मणातितरांशितेतीक्ष्णीकृ
ते प्रेतांजयतानरइंद्रोवःशर्मयच्छतु उग्रावःसंतुबाहवोनाधृष्यायथास
थ १४ योद्धून्प्रसादहेनरःप्रेतप्रकृष्टेप्रकर्षेणगच्छतअनंतरंजयतनवः
युष्माकमिंद्रःशर्मशरणंयच्छतुकिंचनवतांबाहवःतथाउग्राउद्युधाःसंतु उद्गूर्ण
यथायूयंअनाधृष्याअपधृष्याअसथ असौयासेनामरुतःपरेषामभ्यैति
न ओजसास्पर्धमानागूहततमसापव्रतेनयथामीअन्योन्यंनजानन् १५
हेमरुतःयाअसौसेनापरेषांशत्रूणामभ्यैतिअस्मानागच्छतिअभिमुखमागच्छति
अस्मान्प्रतीत्यर्थः सेनाकिंभूताअस्मान्ओजसाबलेनस्पर्द्धमानातांसेनांतथा
गूहतआछुवतकेनअपव्रतेनतमसाव्रतमितिकर्मनामतथाच्येनतमसा

ग्रामानां शत्रूणां सर्वाणि न स्पंदंति तेन ग्रामवता तथा कर्तव्यं यथा अमी सैनिका
अन्यः अन्यं न जानन् परस्परं न जानीयुरित्यर्थः ॥ यत्र बाणाः संपतंति कुमारा
विशिखा इव तत्रा नो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु १६
तत्र तत्र इंद्रः नः अस्माकं शर्म यच्छतु ददातु किंच बृहस्पतिः अदितिश्च विश्वा
हा सर्वदा शर्म यच्छतु तत्र कुत्र यत्र बाणा इषवः संपतंति निर्मर्यादं पतंति क
इव विशिखा इव मुंडितमुंडाः कुमारा इव यथा सर्वमुंडाः कुमाराः क्रीडार्थं
तं तं देशं निपतेयुरित्यर्थः ॥ मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृते शिवः
नानु वस्तां उरोर्वरीयो वरुणस्ते कृणोतु जयंतं त्वानु देवा मदंतु १७ कवचं ध पु२४१
यच्छति ते तव मर्माणि वर्मणा कवचेन छादयामि सोमो राजा त्वां अनु वस्तां आच्छा अमृतेन
दयतु किंच वरुणस्ते तव इदं कर्म उरोरपि वरीयः कृणोतु करोतु जयंतं ते
[illegible]

उ
नयशालिनं त्वा त्वां॰ देवा मदंतु पदर्षयंतु नदेनं आश्रुः त्रिशानः इति कव
चायकं ॥ छ ॥ अथ विभ्राडित्यादि सूर्यस्तकं विभ्राड्बृहत्पिबतु सोम्यं म
ध्वायुर्दधद्यज्ञपतावविह्रुतं वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पु
रुधा विराजति १ सूर्यस्तुतिः सः सूर्यः सोम्यं सोममयं मधु मधिवत्स्वादुभूत
र्यः पिबतु सूर्यः किंभूतः विभ्राट् विशेषेण राजतीति विभ्राट् किं कुर्वन्
यज्ञपतौ यजमाने अविह्रुतं अनवखंडितं आयुर्दधत् स्थापयत् कुक्षु छंद वे
सीति कुवादेशः सः कः यः सूर्यः त्मा आत्मनैव जगत् अभिरक्षति मंत्रे
ष्वाड्ड्या देत्मन इत्याकारलोपः किंभूतः वातजूतः वातप्रेरितः वा तो
यस्य वोढा अथ यः प्रजाः पुपोष पोषयति प्रीतो हलवर्षैः यः पुरुधा
बहुधा विराजति दीप्यते अग्निविद्युन्नक्षत्रादिभिः मधु किंभूतं बृहन्म

द्रत् ३ दृशेसूर्यायपश्यानेयमाख्यातं २ येनापावकचक्षसाभुरण्यंतंजनाँ ॥
रेअनुत्वंवरुणपश्यसि ३ हेपावकयेनचक्षसादर्शनेन जनानअनुल
क्षीकृत्यतंसर्वमेध धारिणंयजमानंभुरण्य पक्षिवत्तरंशीघ्रंगच्छंतंपश्यसिहे
वरुणसूर्यत्वंप्रेक्षसि तेनाख्यानेनस्मानपिभुरण्यंतःपश्येत्यर्थः शाउनी
दिनु॥ वतःशीघ्रगामीभुरण्युरुद्वः देव्यावध्वर्यूआगतंरथेनसूर्यत्वचामध्वा
यज्ञंसमंजाथे हेदेव्यावध्वर्यूदेवसंबंधिनौअध्वरनेतारौआगतंआगच्छ
तंकेनसूर्यत्वचासूर्यदीप्तिनारथेनसूर्यस्येवत्वक्दीप्तिर्यस्यससूर्यत्वक् शिवः
आगत्यच मध्वामधुस्वादेनहविषासोमपुरोडाशादिनायज्ञंसमंजा ५८
थेसमंक्तः अंजेरेतद्रूपंयत्तानिर्हवीभिक्ररूतमित्यर्थः तंप्रत्नाथायं
वेवश्चित्रंदेवानामितिद्वतीकोक्तौआरभ्यंते तंप्रत्नथापूर्वथाविश्व

ऋषीणां साध्वानं । विप्रथाते ब्बाभिव ऋषीणां इमथाद्दानी तनाकामिव १

थोमथाज्येष्ठतातिंबर्हिषदंछं स्वर्विदं प्रतीचीनंवृजनं दोहसेधुनि माशुंजयं
तमनुयासुवर्धसे ५ इसोमस्यागयासुदिक्षुयेषुयजमानेषु अनुवर्धसे जन. पुनः
संस्कुयसेतासुतदीयासुक्रियासु अवस्थितः सन्प्रतीचीनं आत्मनोभिमुखं
इंद्रं अवस्थाप्य स्ववीर्येण स्थापयित्वा अस्मै यजमानाय वृजनं [illegible]लवद्बलफ
लं दोहसे पूरयसि कथं पूरयसि प्रत्नथा उमोपथीयः प्रत्नशब्दः पुराणवचनः पा ५
चि तथा च रेतंनामिव ऋषीणामित्यर्थः पूर्वथा पूर्वेषामिव ऋषीणामि : त्यर्थः
इदं किंभूतं ज्येष्ठतातिं उत्कृष्टविस्तारं अथवा ज्येष्ठप्रशस्यं बर्हिषदं बर्हिषि
तिष्ठंतं स्वर्विदं स्वर्लोकं जानंतं तत्रवासित्वात् धुनिं कंपितारं शत्रूणामिति शेषः
धूञ् कंपने आशुं जयंतं शीघ्रं जयंतं जेतव्यानिति शेषः अयं वेनश्चोदयत्पृश्नि
गर्भा ज्योतिर्जरायू रजसो विमाने इममपां संगमे सूर्यस्य शिशुं न विप्राम

प्रयोगः चंद्रमाः किंभूतः ज्योतिर्जरायुः ज्योतिरेव
जरायुवत् गर्भपुटवेष्टनस्या २ जलस्य २ वृष्टि

तिलीरिढंति अयंवेनःकांतःचंद्रमाइतियावत् पृश्निगर्भाआपःचोदयत्प्रे
रयति पृश्निर्द्युलोकःसूर्योवातस्यगर्भे तिष्ठंतीतिगर्भाः वेनइति विनकांताविि
उ त्यस्यैकस्मिन्समये रजसः विमानेत्यागसमयेग्रीष्मात इत्यर्थः इममेवसोमंत्र
पांसूर्यस्यस्पंदमानानांसंगमप्रतिगृहीत्वाभिवसतीवरात्रिलक्षणामिष्टुतमेधा
मि विनोविप्राःमतिभिः मतिर्वकीर्वाग्भिरिति स्कवंतिवसतीवर्या आपःअयांसं
९ गमेसूर्यगृह्णंतेतावैस्पंदमानानांगृह्यंतेइतिश्रुतिः चित्रंदेवानामितिमाख्या
तं सूर्योपस्थाने आनइडाभिर्विदथेसुशस्तिविश्वानरःसवितादेवएतु अ शिवः
पियथायुवानोमत्सथानोविश्वंजगदभिपित्वेमनीषा सविता देवःनअस्माकंवि ४९
दथेयज्ञेतथातेनप्रकारेणआएतुआगच्छतु इडाभिर्यज्ञकरणभूताभिःसुशस्ति सुशस्ति
भिःशोभनसंज्ञानैःदेवस्तुतैःसविताकिंभूतःविश्वानरःविश्ववर्त्तिनोजनानुख

३

त एव रक्षकः विश्वानरः स्वपानः इत्युक्तः तथा कथं अपि यथा येन प्रकारेण दे
युवानः सर्वकर्मज्ञमाः अपरणामितः अदृष्टा देवा इति यावत् नः कृते विश्वं
जगत् मरूथ तर्पयत अत्रुतिपित्वे अतिपतन काले अन्नायवा कयामनी माछु २३
घ्या यदंद्यकम्बं दृत्रदंनुदगात्र तिसूर्य सर्वं तदिंड तेवशे हे सूर्य वृत्रमो र्वतंत ६२
म स्तस्य हंतः यत् कश्च यत्र कुत्र चित् त्वमसुदमाः अभ्युदेषि हे सूर्य परमे २६
७ श्वर तत्सर्वं तव वशो वर्तते तत्र त्वमेवैक ईश्वरो नान्य इत्यभिप्रायः तरणिर्विश्वद
र्शितो ज्योतिः कृदसि सूर्य विश्वमाभासि रोचनं १० हे सूर्य त्वं तरणिः ऊर्ध्वप
वत्रे से विश्वदर्शितः विश्वस्य दर्शनीयः ज्योतिः कृत् ज्योतिषां कर्त्ता चासि अतस्त्वा
मित्यं ब्रूमः त्वमेव विश्वं सर्वं जगत् आभासि दीपयसि विश्वं किं भूतं रोचनं दीप्य
मानं अग्नि विद्युन्नक्षत्रादि रूपेण त्वमेव सर्वत्र भासीत्यर्थः तत्सूर्यस्य देवत्वं त

महित्वं मध्या कर्त्तोर्विततं संजभार यदेदयुक्त हरितः सधस्थादाद्रात्री वास
स्तनुते सिमस्मै ११ सूर्यस्य तद्देवत्वं तद्देवमहित्वं महिमा यत् कर्त्तोः कर्मणां
मध्ये विततं रश्मिजालं कल्पान्तकाले संजहार संजहार तेनान्य एवं न शक्नोति
ततिं तु नोपसंहर्त्तुमित्यभिप्रायः किंच यदा यत् इत् अयं सधस्थात् रश्मीनां सह
स्थानात् अर्थात् पृथिव्यादिलोकत्रयात् ते हि तत्र निपतंति अतस्तस्मात् सधस्थात् हरि तश्च
तः हरिद्वर्णान् अश्वान् यद्वा रश्मीन् आत्मनि [illegible] युक्तवान् आत्मसंस्थान् अक
रोत् आद्रात्रीति आत् अथ सिमस्मै सर्वस्मै जगते रात्री वासः तमोमयं वासः शिवः
तनुते विस्तारयति एवमेकत्रादित्यसहितं ज्योतिरन्यत्र तमः आदित्यप्रतापा ५०
द्वसतीत्यभिप्रायः तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे अनं
तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः संभरंति १२ सू

योमित्रस्यवरुणस्यअग्निश्चहेअग्निदर्शनायद्यौः द्युलोकस्यउप स्थेतत्
संगे तत्रूपंकृणुतेमंडलाकृतिरूपंकरोतीत्यर्थः मित्रोदिसुकृतिनो
ऽनुगृह्णातिवरुणो दुःकृतिनःसूर्योदौहि एवमनेनप्रकारेणतेजगदनुगृ
ह्णीत इत्यर्थः किंचास्यसूर्यस्यअन्यत्याज्यः रूपंहरितइंद्रियवृत्तयःसंरंतेति
संहितंविभ्रति रूपंकिंभूतंअनंतंअपर्यंतंकालतोदेशतश्चवस्तुतश्चज चन कि॰कृतं
रामरणादिलिंगयुक्तंविज्ञानघनानंदमयमित्यर्थः वण्महाँ२असिसूर्य अन्यत्रहि वेध
वडादित्यमहाँअसि महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२असि १३
हेसूर्यवद्सत्यंमहानसिमहद्असिब्रह्मेत्यर्थः हेआदित्यवट्सत्यंमहानसि
तेजसइतिशेषः किंचमहः महतः तेमहिमामहात्म्यंसर्वदेवेषुवस्थितंः
महानसिअस्मात्सत्यंसमर्थमन्यते यथादर्शनीयोदर्शनीय इतितेन

॰वैश्रा पौ लि॰ हृजमेन अन्तः हेदेव दानकौडादि पुरुष महानत्वतः २
पैस्नर

न
पुनरुक्तिदोषः वट्सूर्यश्रवसामहां२असिसत्रादेवमहां२असिमह्नादे
वानामसुर्यःपुरोहितोविभुज्योतिरदाभ्यं २४ हेसूर्यवट्सत्यंश्रवसाश्र
वणीयेनबलेनमहानसिहेदेवसत्रासत्यंमहानसि किंच मह्नास्वकीयम
हत्वेनदेवानांमध्येअसुर्यःअसिअसुःअस्यास्तीतिअसुरःप्राणीतस्येहितःअ
सुर्यःउगवादिभ्योयत्प्राणिनांहितइत्यर्थःपुरोहितःपुरएनंदधातिसर्व
कर्मस्वितिपुरोहितःप्रथमपूज्यः किंच विभुव्यापकंअदाभ्यंअनुपहिं
स्यंज्योतिःविरोधिनानंदंभ मेवेत्यर्थः श्रायंतइवसूर्यंविश्वेदिंद्रस्यत त्रिवः
द्वतवसूनिजातेजनओजसाप्रतिभागंनदीधिमः २५ यथासूर्यरश्मयः ५२
श्रायंतेकिंचइंद्रस्यइंद्रसंबंधीनिवसूनिइंद्रानुज्ञातानिसूर्येअनजातस
जंतेएवंवयमपिसूर्यंसमाश्रिताःतदुपष्टंतात्विश्वानीन्द्रस्यधनानिजातेउ

क्य

षः मेषायमेवसुखंदेहि त्र्यंबकंयजामहे सुगंधिंपुष्टिवर्द्धनं उर्वारुकमिवबं
धनान्मृत्योर्मुक्षीयमामृतात् त्र्यंबकंयजामहे सुगंधिंपतिवेदनं उर्वारुक
मिवबंधनादितोमुक्षीयमामुतः ५ वयंत्र्यंबकंशिवंयजामहे पूजयामः सुगं
धिंमर्त्यदोषरहितंपुष्टिवर्द्धनंपोषवर्द्धयितारंअतःसोऽस्मान्मृत्योः संसारात्
मुक्षीयमोचयतु पुरुषव्यत्ययश्छांदसः कस्मात्किमिव बंधनात् उर्वारुकमि
व उर्वारुः कर्कटीविशेषः अनायासे दृष्टांतः मामृतात् अमृतात् मोक्षात् मामो
चयतु कुमार्यस्त्र्यंबकंशिवंयजामहे पूजयामः किंभूतंसुगंधिंशोभनगंधिंपति
ददाति २ वेदनंपतिंवेदयतीतिपतिवेदनं सद्भर्तुर्लब्धारमित्यर्थः विदॢ लाभे किंप्रार्थयं
ते इतः ज्ञातिवर्गात् सः त्र्यंबकः मुक्षीयमोचयतुबंधनात् उर्वारुकमिव अमु
तः पतिस्थानात् मामोचयतु एतत्तेरुद्रावसंतेनपरोमूजवतोतीहि अवतत

ततत

वत

६२ धन्वापिनाकावसः कृत्तिवासाः अहिंसन्नः शिवोतीहि ६ रुद्रमजयति हेरु
द्रा तत्र अवसं पथिनः हसंस्तेन संबलेन परः परस्तात् मूजवतः पर्वतात् त्वं अ
तीहि गच्छ मूजवान्नाम पर्वतो रुद्र वसति कथंभूतो गच्छ अवततधन्वा अवततं वित त
तं धनुर्यस्य सः अवततधन्वा पिनाकावसः पिनाके कृतः अवसो यस्य पिनाको रु
द्रायुधं कुरुजां उद्रा कृतसंबल इत्यर्थः अहिंसन्नः अस्मान् अहिंसन् अ
नाशयन् शिवः सन् अतीहि ६ शिवपूजितः सनाह्य धुनरुक्तिस्त्वरार्थः त्र्या
युषं जमदग्नेः कश्यपस्य त्र्यायुषम् यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ६ त्री
णि आयूंषि समाहृतानि त्र्यायुषं बाल्ययौवनावस्था च जराणि तथा च यत् जम शिवः
७२ दग्नेः कश्यपस्य यत् देवेषु त्र्यायुषं तत् नः अस्माकं त्र्यायुषं अस्तु इत्याशीः प्रार्थ ६२
नं शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिंसीः निवर्त्तयाम्या

नस्के १   नवर्तते २

युषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्याय ८ देकरयस्त्वंशि
वोनामसितेस्वधितिर्नेऽ॑पितातेनमः अस्तु देलगवन्मामाहिंसीःमानात्राय॥ ५
त्वयानिवर्तयामिसुंडयामिनिश्वोहृत्रिमुद किमर्थंअन्नार्थेअन्नाद्यायअन्ना ७
मा यनन्नित्नायच यद्वा अन्नंवनदाद्यंचेति अन्नाद्यंतस्मैप्रजननायप्रकृष्टजनना
यरायस्पोषायरायो धनंतस्पपुष्टैप्रजास्त्वायशोननापत्रतायैसुवीर्याय
एषतेदेव्याख्याते नमस्तेदेअश्चर्यायेचव्याख्याते नतंविदाथयइमाजजाना-
न्यद्युष्माकमंतरंबभूव नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंति
गौ ९ इदंविश्वकर्मामनुष्याणामुपदेशंकरोति तंपुरुषंयूयंनविदाथनविजानी प१पा२
थतंकंयःइमानित्नतानिजजाननजनयतियतःउपष्टंसनंसवतिअतंकारणा
तअस्माकंतस्यचअन्यत्महत्अंतरंबभूवपुरुषोजनकोयूयंजन्याःपुरुषो

१भ १

ग्रामकः यूयं ग्राश्चाइत्यादि यदि ज्ञात्वा सत्येनोपास्यते तदा न संसारः स्यात् तथा
चायं भेदः संसारित्वमात्रकृत इत्यर्थः एवं प्रत्यक्षमुक्त्वा अथेदानीं परोक्षमस्तिनये
न दर्शयन्नाह नीहारेत्यादि ये चैते नीहारेण आ अविषयाः प्रावृताः अवगुंठि
ता ये जल्प्याः जल्पप्रवृत्ताः हेतुपक्षदृष्टांतैः आत्मज्ञानप्रजल्पकाः तार्किका इति या
वत् ये च असुतृपः असून् प्राणान् तर्पयंति ते असुतृपः देहालंकारिणः तेषां
यद्देवांतरं बलं स्ववनदेव सवतामित्यर्थः ये च उक्थानि यज्ञे ये यज्वानः शंसंति ते उ उक्थशास
क्थशासः यज्ञशीलाः ते पि पुरुषं प्रतिचरंति विचलंतितं न जानंतीत्यर्थः ॥
ये तु पुरुषाविदस्ते पुरुषमेव यजंति तथाच पुरुष एव ज्ञातव्यः तेन संसृतिना शिवः
शो मोक्षो भवतीति वाक्यार्थः विश्वकर्मा ह्यजनिष्ट देवा आदिद्गंधर्वो अभवद्द्वि ७१
तीयः तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात्पुरुत्रा २ विश्वकर्मा आदि ६८

[illegible] किं [illegible] बहुप्रकार
[illegible]

ऽस्यां तरश्रुरुषः अजनिष्टजातः किंभूतः देवः दानादिगुणयुक्तः आ तू इ
तू इति निपातौ आनंतर्ये अथानंतरं गंधर्वः अग्निर्द्वितीयोभवत् गां वाचं वा धा
रयति गंधर्वः गां पृथ्वीं धारयतीति वा गंधर्वः ज्ञातः अग्निर्वाचकत्वेन तावग्नि
अषधीनां जनिता पालयिता पर्यन्यः घनः तृतीयोभवत् सर्वत्तमः सर्वयोगर्भे
अधात् मीढुष्टमेति चत्वारि व्याख्यातानि   इति श्रीमन्महामहोपाध्यायश्रीश
त्रुघ्नमिश्रकृतायां मंत्रार्थदीपिकायां षडंगपरिच्छेदः   अथ वैवाहिकाद
यो मंत्राः   तत्र प्रथममर्यम्णो मंत्राः   वर्षोऽस्मि समानानामुद्यतामिव सूर्य इमं त
मभितिष्ठामि यो मा कश्चाभिदासति   अहं समानानां समानजातीयानां वर्ष्म अ
स्मि श्रेष्ठोऽस्मि वा इमं केषां क इव उद्यतां उदयगामिनां चंद्रतारकादीनां सूर
र्य इव किंच यः कश्चिन्मां अभिदासति मिमं विहाररूपतामापन्नं अभितिष्ठति

ह्यामि अस्मिन्नर्वौदासनिर्हिंसायां वर्त्तते इति कर्कभाष्यं विराजो दोहोसि विराजो

प दोहमशीमहि पाद्यायै विराजो दोहः हे जलत्वं विराजः विशिष्टदीप्तेर्दोहः प्रपूरणो

सि त्वमसि अहं विराजो दोहं विशिष्टदीप्तिः प्रपूरकं त्वां अश्नीय गृह्णामि विराजो

दोहस्त्वं मपिमम पाद्यायै पाद्याय त्वं तथा च त्वामनिमंत्रयामि मम पादस्य वि

शिष्टदीप्तिः अक्कितिवाक्यार्थः अश्नीयेति अशद्गीप्यादाने षितस्य धातोः आ

शिषि लिङि आय स्य युष्माभिः सर्वान्कामानवाप्नवानीति हे

आपः अत यूयं आपः स्थ आपः त्वं च अश्नुवंतीत्यापः अतो हं युष्माभिर्देहा शिवः

य नाभिः सर्वान्कामानवाप्न वानि प्राप्नुयां समुद्रवः प्रहितो मिस्वां योनि ५०

निमभिगछत अरिष्टास्माकं वीरा मा परासेचि मत्पयः हे आपः वः युष्मान् समु

द्रं प्रहितो मि प्रस्थापयामि मया प्रहिता यूयं स्वां योनिं समुद्रं अभिगछत यूयं

मद्यपानयोग्या इति सकाः सवेन्द्रापे . नमाहेसका . सत्यः सगुडं
असमाकं १॥ गृहं तु । मत्स्यान कोऽपपयः अतेवति छक्षितिवाक्यार्थं २

किंभूता अरिष्टाः अहिंसका वीरा उत्कृष्टाः न स्यः मदीयपानयोग्यं नद्यः स्तुवः
नामन्दोः पत्ययस्तस्तुनः मापरा सेचिन रेडोतनाप गच्छत तथाचतदि
देव तिष्ठत्वित्यर्थः आ मा गमन्नाशासः सृज वर्चसा तं मां कुरु प्रियं प्रजानाम
धिपतिं पशूनां मरिष्टं तनूनाम् हे जल मा मां यशसा आगन् आगमय मां यश
स्विनं कुर्वित्यर्थः किं वर्चसा तेजसा मां संसृज संसृष्टं कुरु तथा मां प्रजानां
प्रियं कुरु पशूनां गवादीनां अधिपतिं कुरु तनूनां शरीरावयवानां अरिष्टं अ
पहृतिं कुरु रिष्टिर्यत आगन्निति गमधातोरंतर्भावितण्यंतस्य लोट्म
मध्यमपुरुषैकवचनं बाहुलं छंदसीति विकल्पेन सेर्हिरादेशो न संभवति मोनो
धातोरिति मकारस्य नकारः मित्रस्य त्वा चक्षुषा प्रतीक्षे हे मक्षपर्क त्वा त्वां
मित्रस्य सर्वस्य चक्षुषा प्रतीक्षे पश्यामि अहमादित्येन चक्षुर्दानेनानुग्रहीतः त्वा

मधुपर्कं पश्यामीति वाक्यार्थः देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो ह
स्ताभ्यां प्रतिगृह्णामि हे मधुपर्क त्वां प्रतिगृह्णामि कस्मिन् सति सवितुर्देवस्य प्र
सवेभ्यनुज्ञाते सति संमतावितियावत् प्रपूर्वः सु वृत्तिरभ्यनुज्ञाने इत्युक्तः केसेत
गुणविस्तुश्च केन ग्रहणं अश्विनोः अश्विनीकुमारयोर्बाहुभ्यां तथा पूष्णः आदि
त्यस्य हस्ताभ्यां तथा च तैरभ्यनुज्ञादानादिभिरनुगृहीतोहं त्वां गृह्णामीति वाक्या
र्थः नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निःकृन्तामि मधुपर्कप्रसाद देन
मस्य नमस्काराद् हे श्याव रूपायान् श्याव रूपाणि वामि स्यध्याहार्यं किंच ते तव अन्नश शिवः
ने भोजने [illegible] यत् आविद्धं उपहतं ते तव तत् निःकृन्तामि अपसारयामि अथवा ७२
उपायानि [illegible] ति रूपेङ् गतावित्येतस्मादव पूर्वादाङ्पूर्वाद्वा भिस्रम
र्थः श्रवर्णागमो वर्णविपर्ययश्चेति प्रथमसकारस्यानेश्याकारः अग्निमश्राका

रस्थाने सकारः छांदसत्वाद्विसर्गश्च यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं
मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि ॥ मधुनः यत् म
धव्यं मधुरं परममुत्कृष्टं अन्नाद्यं अन्नाद्यमिव यथा अन्नाद्यमुपभुक्तं बलादिकमा
दधाति तथा रूपं तेन मधव्येन इत्यत्र द्वितीयार्थे तृतीया तथा च तं म धुनः मध
व्यं परमं अन्नाद्यं च रूपं अहं असानि अश्नामि तस्यामि मधव्यमित्यादिषु न विशेष
णमादरातिशयार्थे ॥ अहं किंभूतः परम उत्कृष्टः मधव्यः मधुरशीलः अन्नादः अ
न्नमत्तीति नैदः वाङ्म आस्येऽस्तु नसोर्मे प्राणोऽस्तु अ क्ष्णो मे चक्षुरस्तु कर्णयोर्मे
श्रोत्रमस्तु बाह्वोर्मे बलमस्तु ऊर्वोर्मे ओजोऽस्तु अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह
संतु मे मम मुखे वाक् वचनमस्तु नासिकयोः प्राणः श्वासवायुः अस्तु ॥
मे मम अक्ष्णोर्नेत्रयोश्चक्षु र्णयोः शष्कुल्योः श्रोत्रमिंद्रियमस्तु बा

गेतक

६६ केवलं सामर्थ्यमस्तु अत्र वे। रूक्षं गानि शिरःप्रभृतीनि अरिष्टानि आप
द्‍दूषितानि भवंतु मे ममतन्वा शरीर ः शरीरावयवाः अरिष्टाः संतु अनेन
मम स्पर्शेन मुखाद्यवयवेषु वचनादिना ...स्मिन्नेवतु आपद्यन्तां न भवति तिवाक्या
र्थः माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितु
षेजनाय मागामनागामदितिं वधिष्ट मम वचोमुष्य शर्मणो यजमानस्य पापमाहत जों
मुक्त्वा ज नं हणाम्यतु अतोहं यजमानश्चिकितुषे जिज्ञासमानाय शुश्रूषवे जनाय
प्रवोचं उनःउन रुक्तवानस्मि अत्र शुश्रूषवे नोपदे क्षमर्हतीति चिकितुषे इत्युक्तं शिवः
किं वदसि मा गां वधिष्ट मा गां हिंसीः गां किं भूतां अनपराधां अदितिं दितिः खंडनं हिं ७४
सा सा यस्यां नास्ति सा अदितिः यतः सा रुद्राणां माता वसूनां दुहिता आदित्यानां स्व
सा अमृतस्य देवानां स्तनस्य नाभिरुत्पत्तिस्थानं। तथा च एत वमपि सर्वथा अ

शुक्लाणां ३

हिंस्येति भावः मम चार्हणीयस्य अमुष्य चार्हणाकर्त्तुः पाप्मा पापं हतं हतं तु ओमि
ति स्वीकारे अन्नु उत्सृजत गां मद्वचनात् यस्मात् मुंचेत्यर्थः प्रणवो च मित्रेत्य मो चशब्द
उत्सृजतेत्यत्रान्वेति तदनंतरं तृणान्यत्तु मुक्ता सती तृणानि खादतु अत्राशंसा वाक्या
र्थः जरां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा शतं च जीव शरदः
सुवर्चा रयिं च पुत्राननु संव्ययस्वायुष्मतीदं परिधत्स्व वासः हे आयुष्मति कन्यके जरां
गच्छ चि रंजीविनी भवेत्यर्थः वासः परिधत्स्व वस्त्रं परिधेहि वस्त्रवियुक्ता मा कदा चि
दपि भवेत्यर्थः आकृष्टीनां भव आकृष्टीन [illegible] ध्यां षष्ठी आकृष्टीमनोहरा अ
भिश [illegible] स्तिपावा अभिशस्तिः शाप [illegible] पवित्रा भव किंच शरदः वर्षाणां श
तं जीव किं च त्वं सुवर्चाः शोभन [illegible] किंच रयिं धनं अनु संव्ययस्व संवृणु धा
रयस्वेत्यर्थः न केवलं [illegible] अत्राप्याशंसैव वाक्यार्थः या अकृंतन्

वी१ त२

६१ वयन्त्या अवतन्वत याश्च दे .. नतं थ तास्मात् देवे जरसे संव्ययस्वायुष्मतीदंपरि
धत्स्व वासः देवीआयुष्मतिय ८ अत्रन् अर्कं नन्वत्वं परिधानस्येति शेषः ॥
अर्कं तन्न कर्तित वसः याश्च तन्तू २ उतवत्नः आश्च अतन्वत विस्तारित
परिधापयत ४ वत्यः ताः देवीदेव्यः त्वां संव्ययस्व संव्ययन्तु ७ मः तथास तिन्त्वं वर इदं वासः त
तं घ विस्तारयन् आसितः सर्वतः ततः परिधत्स्व किमर्थं जरसे दीर्घायुत्वाय अ
वयन्निति वेञ् तंतुसंताने इत्यस्य देवीरिति प्रथमा बहुवचने छंदसीति दीर्घः
त्वं ततं थेति तनु विस्तारे इत्यस्य णिचि संव्यस्वेति तिङ्क्ते वंतीति प्रथमपुरुष प४ शिवः
बहुवचने मध्यमपुरुषवैकवचनं परिधापयेत्यस्य व्याख्यानम् कन्यादानं गोत्रो ७प
च्चारः सेद्दरै समंजंतु विश्वे देवाः समापो हृदयानि नौ सं मातरिश्वा सं धाता समु
देष्ट्री दधातु नौ विश्वेदेवाः नौ वयोः हृदयानि हृदये समंजंतु संगमयंतु अपि च

गो

अपौनीयानिनौहृदयानिसमंजंतुपानीयेनोऽसर्गपूर्वकंतवममहृदयंसंगतंल
वत्विसर्थः तथाचमातरिश्वावायुःनौआवांसंदधातुसंयोज यतुतथाधाताप्र
जापतिः नौआवांसंदधातु तथाउदेष्ट्रीइच्छाकर्त्रीदेवताकामदेवःआवांसंद
धातु अत्रउद्देष्ट्रीतिदिशइच्छायामित्यस्यउत्पूर्वस्यतृचिछांदसत्वादिड्नस्तवति
देवतात्विप्रायेणङीश्स्त्रीत्वविवक्षायां कोदात्कस्मात्अदात्कामोदात्कामायो
दात्कामोदाताकामःप्रतिग्रहीताकामैतत्ते कः अदात्दत्तवान्कस्मैअदात्इति
प्रश्नः अत्रोत्तरंकामःअदात्कामाय … तः कामोदाताकामःप्रतिग्रही
ता अतएवदेवकामअभिलाष … वस्त्रकन्यादिकंतव कामशब्दे अत्र
नेच्छाभिधीयतेयतः इच्छा … यतेप्रतिगृह्यते तथाच तत्रैधान्य
प्रतिपादनायदातृत्वं … कामस्यैवोक्तं तेनकामस्तुतिरत्रवाक्या

क

२. थः द्यौस्त्वाददातु पृथिवि ... नं ... कार्थमेतत् एष्वन्तासुपर्यायान् हे कं
न्येतवाये पिता आकाशम् ... रा सर्वोपकार यथाकाशं तद्वसितापि
अहं पृथिवी च यथा पृथिवी सर्वा ... त्वदाश्रय इत्यर्थः पदैषि मनसाद
रं दिशोनुपवमानो वा हिरण्यपर्णो वै ... ामन्मनसां करोतु हे कन्ये यत्
त्वं मनसा दूरं एषि गच्छसि पितृकुलतो वा ... अत्र केन नीये इति मनसा दूरं
गच्छसि सोल्कं गान्तवसीति यावत् तत्र दिशः प्राच्या अनु अनंत रं पवमानो वा व प
मान श्च वायुः सम्भवये हिरण्यपर्णः हिरण्यं पर्णं रथो यस्य सः सहिरण्यपर्णः शिवः
सूर्यः वैकर्णः किकर्णो कोटरे तिष्ठति वैकर्णः अग्निः ते दिव्या सूर्योग्नयः ७६
न२ त्वां मन्मनसां करोतु मगानहृदयां कुर्वंतु ... पतिघ्न्यैधि शिवा पशुभ्यः सुमनाः सु
वर्चा वीरसूर्देवकामा स्योना शंनोभव द्विपदे शं चतुष्पदे सोमः प्रथमो विविदे
दू२ ... त्र कन्यका ... पतिर ... स्वहृदपेव ... मा वा ... २
अघोरचक्षुः२

त्येतदर्थं किंच बृहस्पतिस्त्वां मह्यमदात् दत्तवान् तथा सवितृ त्वं प्रजावती प्रजादि
सहिता मया पत्या सह शरदः शतं शतवर्षाणि जीवत्वमपि शास्वती सर्वे मेतदर्थं
प्रार्थयामी त्यंतर्लीवितशिच क्षवमिति स्त्रीलिंगत्वे प्रश्नेनपुंसकलिंगत्वं छांदसं ।
इति विवाहमंत्रव्याख्यानं अथ चतुर्थीकर्ममंत्रव्याख्यानं अग्ने प्रायश्चित्ते त्वं
देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्ता
मस्यै नाशय स्वाहा हे अग्ने प्रायश्चित्ते सकलदोषा[illegible]क्षण स्वरूप देवानामिं त्व
द्रादीनां प्रायश्चित्तिरसि दोषापहर्त्री न वसि अतः कारणात् त्वा त्वामुपधावामि रूपलक्षणं
उपसर्प्यामि अहं किं भूतः नाथकामः याच्ञाकामः याच्ञार्थमुपसर्प्यामि इत्यर्थः
कायाच्ञा अस्यै अस्याः कन्यकायाः या तनूः पतिघ्नी यदंगं पतिहिंसकं अस्याः
तां त्वं नाशय अकुरु तलक्षणमपाकुर्वित्यर्थः हे अग्ने यतस्त्वं देवानामपि दोषा
पा ई

यद्दत्तो ऽतो मदुपस-र्पितः सन् अस्यास्तदलक्षणं नाशयेत्यर्थः अस्यै इति ष
ष्ठ्यर्थे चतुर्थी वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उप
धावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा हे वायो अस्याः या प्रजाघ्नी संता
न विरोधिनी तनूः अन्यत् समानं सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मण
ना ७ स्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय हे सूर्य अस्याः या पशुघ्नी
गवादिनाशिनी तनूः अन्यत् समानं चंद्र॰ ब्रा॰ यास्यै गृहघ्नी तनूः॰ हे चंद्र अ
स्याः या गृहघ्नी गार्हस्थ्यविरोधिनी तनूः अन्यत् पूर्ववत् गंधर्व प्रा॰ यास्यै यशोघ्नी
तनूः हे गंधर्व गोः किरणस्य धारक प्रकाशक अस्याः यशोघ्नी यशोनाशिनी त ८६
नूः अन्यत् पूर्ववत् याः ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निंदिता तनूर्जारघ्नी
त तामेनां करोमि सा जीर्यतां मया सह असौ या तव निंदिता दोषवती तनूः तामेनां

करोमि सञ्जीर्यत्वं मया सह अ[illegible] तत्त्वं जारउपपतिः तस्माद्यानि तानि
करोमि स्वकानिंदिता तन्नः याः पतिघ्नी प्रजाघ्नी गृहघ्नी यशोघ्नी ततो मा द्रक्ष्यैव अने
सा त्वं मया नचालिषेक कर्मणा संदत्तीर्यजरां प्राप्नुहि दीर्घायुर्भवेत्यर्थः प्राणैस्ते प्राणान्संद
धामि हे कन्यके तव प्राणान्प्राणैरर्थान्मदीयैः संदधामि संयोजयामि अस्थिभिस्तेऽ
स्थीनि मांसैस्ते मांसानि संदधामि त्वचा ते त्वचं संदधामि अनेन स्थालीपाकप्रा
शनेन कर्मणा मया सह तव एक प्राणत्वमेकास्थित्वे कचर्मत्वानि करोमीति वाक्या
र्थः ॥ इति चतुर्थी मंत्रव्याख्या ॥ अथ निष्क्रमणं तत्त्वदश इति व्याख्यातं ॥ अथान्नप्रा
शनं ॥ देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति सा नो मंद्रेषमूर्जं दुहा
ना धेनुर्वागस्मानुपसुष्टुतैतु देवा ब्राह्मणादयः वाचं वाणीमजनयंत उत्पादितवंतः ति
वाणीं किंभूतां दैवीं कांत्यादिगुणवतीं तां वाचं विश्वरूपाः मनुष्यादिरूपाः पशवः
वदंति देवापेक्षया स्वल्पज्ञानत्वेन पशुत्वं सा वाक् धेनुर्भूत्वा अस्मानुपैतु उपयच्छ

श्री

१९ तु उपइतिअवहितं एविसनेनसंबध्यते हेतुगर्भं विशेषणमाह धेनुः किंभूतानोस्मा
सामर्थ्ये कं ऊर्जंदुहानापूरयंता ऊर्जंकिंभूतंमंदेषंमंसदो मंगो अन्नमकइतियावत् तस्यइ
षंगमकं ज्ञापकं इतियावत् अप्यकः परोक्षोप्यर्थो येनावगम्यते तस्यामधे अस्माकं
पूरयंतीत्यर्थः ३॰ किं॰ तासुष्टतासुंस्कृता वाजोनो अद्यप्रसुवातिदानंवाजोनोदेवां ॥
या .॥तू ऋतुभिः कल्पयति १ वाजोहिमासर्ववीरंजजानविश्वा आशावाजपतिर्जयेयं वा
। जः अन्नंनोस्माकंअद्यास्मिन्प्राशनसमयेदानंहोमरूपंप्रसुवातु अभ्यनुजानातु प्रसू
वेः सुवति रभ्यनुज्ञाने वर्त्तते इत्युपटः किंच वाजः देवानिंद्रादीन्ऋतुभिःसमयविशेषै
कल्पयति योजयतु अस्मिन्कर्मणि कृते नान्ने देवश्चिरकालं वर्त्ततामित्यर्थः द्वियतः शिवः
वाजः मामां सर्ववीरं सर्वकार्येषु वीरं क्षमं वंकारकृतवान् अतः कारणात् वाजपति ८३
रन्नस्य ईश्वरो हं सर्वाः आशाजयेयं प्रसुवाति कल्पयाति इत्यंलोट् प्रत्यये रूपं प्राणे
नोन्नमशीयस्वाहा प्राणेन प्राणवायुना अन्नमदनीयं अशीय भुंजे अपानेन गंधर्म

न्मीय स्वाहा अपानेन अपानवायुना गंधानसी प चक्षुषा रूपानत्रीय स्वाहा
चक्षुरिंद्रियेण रूपानि शुक्लादीनि अश्नीय श्रोत्रेण यशः अश्नीय श्रोत्रेण को
रणेनेंद्रियेण यशः कीर्तिं अश्नीय अन्नगंधरूपयशांसि अन्नानमुपभोगमनुभ
वामीत्यान्नां वा क्यार्थः अत्र वाशीये सुतम द्रूपयोगात् कर्ईगो चरमांत्रां ग्रीय
द्यपिप्र तीयते तथापि कुमारगोचरैव बोद्धव्या तथा च श्रुतिः यां कांचि द्यज्ञे ऋत्वि
जआशिषमाशं सति यजमानस्यैव मिति इति अन्नप्राशनमंत्रव्याख्या अ
थ चूडाकरणमंत्रव्याख्या उष्णेन वायउदकेनेंदविते केशान्वप॥ हे वाय वायोवा
युसंबोधनेनात्र कार्यैकारणोपचारात् जलमेव संबोधितं हे जल किंभूत अदि
ते इति दीवखंडन इत्यस्य धातोः क्तिन् सावित्र्यांप्रसूता दैव्या आपउंयं दंतु ते तर्दं
दीर्घायुत्वाय वर्चसे आपः उलानि ते त वकुमारस्य तनूं देवा वयवं उंदंतु क्लेद

ए·

यंतु उंदीक्लेदने आपः किंभूताः सवित्राप्रसूता अनिताश्वः ॥ किं॰ दैव्यादितिश्रा
कारोउसन्नाः किमर्थमुंदंतु दीर्घायुत्वाय चिरंजीवित्वाय वर्चसे तेजसे
ओषधे त्रायस्व स्वधिते मैनं हिंसीः हे ओषधे एनं कुमारं त्रायस्व रक्ष हे
स्वधिते वज्र एनं कुमारं मा हिंसीः मा नाशय तथा च कुशोकृत रक्ष मेनं कुमारं व
ज्रमा हिं नस्क इति वाक्यार्थः शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा
मा हिंसीः हे क्षुर शिवो नामासि शिवः कल्याणं इत्यभिधाने सि शिव इति तव
नामेत्यर्थः किंच स्वधिते वज्रं ते तव पिता वज्रात्त्वोत्पत्तिरित्यर्थः एवंभूताय शिवः
तुभ्यं नमोस्तु त्वं मां मा हिंसी मा व्यथय स्तुतिपूर्वकं याच्ञैव वाक्यार्थः अत्रापि पू ८८
र्ववत्कुमारविषय एव वाक्यशेषो यो निवर्त्तयाम्यायुषेन्नाद्याय रायस्पोषा प्रजननाय
य सुप्रजास्त्वाय सुवीर्याय अहं क्षुरं निवर्त्तयामि निश्चयो वर्त्तिं संत्यापने वर्त्ते

संयोजयामि

ते इतिकर्त्तव्यतां क्षुरस्यकर्मत्वंप्रकरणात् किमर्थंक्षुरस्ययोजनमित्या
ह आयुषेजीवनायतथाअन्नाद्याअन्नंचतत्अद्यंचेतिअन्नाद्यंतदर्थंराय
स्पोषाय रायधनस्यपोषायवृद्ध्यर्थंतथासुप्रजास्त्वायशोभनसंततिसत्वार्थं
तथासुवीर्यायउत्कृष्टवीर्यार्थंअनेनक्षुरकर्मणाकुमारस्यान्नादीनिसवंती
त्याशंसावाक्यार्थः सुप्रजास्त्वायेतिसकारश्छांदसः वर्णागमोवर्णविपर्ययश्चे
तिन्यायात् येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान् तेनब्रह्म
णोवपतेदमस्यायुष्यंजरदष्टिर्यथासत् हेकुमारतेनक्षुरेणसविताआदित्यः
विद्वान् वेदवित्तथातेनवब्रह्मणः ब्रह्मातथावपतेमुंडयति तेनकेनक्षुरे येन
णसविताआदित्यःसोमस्यअवपत् अंतितवान् अर्थात्केशान् किंतुत
स्यसोमस्यराज्ञः नकेवलंसोमस्यकिंतुवरुणस्यच किंतुतःआदित्यः विद्वा

न्नवेदवित् तथाकथंयथाऽदंचूडाकरणंतवत्र्यायुषंअस्तन्नस्यात् किंतत्तमा
युष्कंजरदृष्टिःजरत्वार्द्धकमश्नुतेमाप्नोतीतिवार्द्धकपर्यंततवायुर्यथास्यादि
त्यर्थः आदित्येनसोमवरुणयोर्येनक्षुरेणचूडाकर्मकृतंतेनब्रह्माकरोतीति तव
कृत्वातनवायुष्मत्यादिस्याशंसावाक्यार्थः ब्रह्मण इतिप्रथमैकवचनेषष्ठ्येक
वचनं जरदृष्टिरितिअजदृत्लिंगमेव त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषं य
द्देवेषुत्र्यायुषं त्रीणिआयूंषिसमाहृतानित्र्यायुषंआयुःशब्दश्चावस्था [illegible]व
चनाःबाल्ययौवनवार्द्धकमवस्थात्रयंत्र्यायुषमित्यर्थः तथाचकश्यपस्यक्र शिवः
ष्येर्यत्त्र्यायुषंजम[illegible]येत्त्र्यायुषंदेवानांयत्त्र्यायुषंनःअस्माकमस्त्वयेन ८९
न्नरिश्वरादिर्वक्र[illegible]क्षिस्त्वर्यं तेनतेवपामिब्राह्मणाजीवा तेनवेजीवनाय
सुश्लोकायस्वस्तये येन[illegible]णसाधनस्त्तेनत्वरिश्चंद्रमादिवंज्योक्च स्वर्गेसंगत

ज्यो

मनुष्य सो ... वश्वाकात पते। कफां ... धीरा नास्ति पुत्रः प्रमोषीः ५

समभवत् चंद्रमा किंभूतः चरणः क्रमणशीलः पश्चात्स एव चंद्रमाः अधिसू
र्यस्य सूर्येण सह संगतोऽभवत् तेन क्षुरेण ते तव वपामि त्वां क्षौरयामि कस्मै फलाये ॥ वा तते
त्याकांक्षायामाह ब्रह्मणा नूनमेवेद्दलः लार्थं जीवनौषधार्थं जीवनोपायप्राप्त्यर्थ
मित्यर्थः जीवनाय चिरकालजीवनार्थं सुश्लोक्याय सुशोभनं श्लोकं यशः त
दीयलाभार्थं स्वस्तये कल्याणार्थं ॥ येन क्षुरेणेति ॥ येन क्षुरेण तस्य कुमारस्य वधा
वापति क्षौरं समाप्ययुनः क्षौरं करोषि तेनास्य केशान् छिंधि आयुष्मान् मोषी आ
युःखंडनं माकुरु क्षुरेण किंभूते न शिरः मज्जतानिष्कलुषं कुर्वता पुनः किंभूतेन उ
पेक्ष्या साक्षोभेनायुधेन वपतीति मध्यमपुरुषैकवचनं तिङां तिङो भवंतीति प्रथमपु
रुषैकवचनं प्रमोषीरिति मुषस्तेये मज्जयते निङ मज्जोऽस्य वक्षा वेति वा शाहः स
मुच्चयार्थः इति चूडाकरणमंत्रव्याख्या अथोपनयनमंत्रा व्याख्यायंते येनेंद्राय
बृहस्पतिर्वासः पर्यदधादमृतं ॥ तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय

बाधमाना वर्णं पवित्रं पुनती म आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयं

बृहस्पतिर्देवानामाचार्यः येन विधानेन इन्द्राय इदं वासः पर्यदधात् परिधा
पितवान् किंभूतं वासः अमृतं अमृतं तेन विधानेन त्वां परिधामि परिधापयामि
किमर्थं आयुषे जीवनाय दीर्घायुत्वाय चिरजीवित्वाय बलाय सामर्थ्याय वर्चसे तेजसे
पर्यदधात् परिधामीति [illegible]यमपि पूर्णार्थं इयं दुरुक्तं परि इयं मेखला आगात् आ
गतवती किं कुर्वाणा मम मदुरुक्तं अध्याप्यमनुयवीत तिउर्वलं परिबाधमाना
सर्वतो लावेन खंडयंती अतएव वेदोक्तवाद्विषया पुनः किंभूता वर्णं द्विजातिपवि
त्रं उत्कृष्टं पुनती पावयंती ईदृशं यं मेखला स्वसा अस्मत् भगिनीव नित्यमभ्युदयार्थि शिवः ९
नी अस्मत् किंभूता प्राणापानाभ्यां बलमादधाना प्राणापानयोः सामर्थ्यमर्पयंती
पुनः किंभूता सुभगा अकर्कशा सुखस्पर्शेति यावत् यज्ञोपवीतं [illegible] हेमा
णावक यज्ञोपवीतं प्रतिमुंच धारय प्रतिपूर्वो मुंचति धारणे वर्त्तते यज्ञोपवीतं
मं पवित्रं प्रजापतेर्यत् [illegible] प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु
तेजः ॥२

किं कृतं आयुष्यं आयुर्वृद्धिकरं अग्र्यं श्रेष्ठं शुभ्रं श्वेतं निर्मलं परमं अतिशयेन पवि
त्रं किं कृतं यत्पुरस्तात् पूर्वं प्रजापतेः ब्रह्मणः सहजं सह जातं प्रजापतिना सह एक
समये जातमित्यर्थः एतत्परिधानेन बलं अस्तु तेजश्चास्तु इति॥ यो मे दंडः परा॰ म
म यो दंडः अधि भूम्यां भूमेरुपरि पराऽपतत् पतितः तं दंडमहं पुनः आददे गृह्णामि
किंभूत दंडः वैहायसः विहायः आकाशं तत्र भवः एतावता प्राक्तनजन्मन्यपि अ
हं द्विज आसं अस्मिन्नपि जन्मनि दंडं गृह्णामीति वाक्यार्थः किमर्थं दंडं गृह्णामि आ
युषे जीवनार्थं ब्रह्मणे वेदाय ब्रह्मवर्चसाय तेजःप्राप्त्यर्थं तच्चक्षुरिति मारभ्या
त संध्यायां मम व्रते ते हृदयं दधातु इति विवाहे मास्मात इंद्रस्य ब्र[illegible] इंद्रस्य परमेश्वर
स्य ब्रह्मचारी असि तव अग्निः आचार्यः सर्वेषामेव द्विजातीनां सामान्येनाग्निर्गुरुत्वा
त् यथा गुरुरग्निर्द्विजातीनामिति श्रुतिः इदानीं तु तवोपनयनकर्तृत्वेनाहं
चार्यस्त्व आचार्यस्तवाहमाचार्यस्तव श्री अमुक शर्मन्॥५२

१२ माचार्यः॥ प्रजापतये ब्रह्मणे परिददामि एवं सवित्रे सूर्याय देवाय दानादिगुणयु
क्ताय अद्भ्यः जलेभ्यः ओषधीभ्यो ब्रीह्यादिभ्यः द्यावापृथिवीभ्यां आकाशभूमिभ्यां वि
श्वेभ्यः सर्वेभ्यः देवेभ्यः इंद्रादिभ्यः सर्वेभ्यः भूतेभ्यः राक्षसादिभ्यः परिददामीति सर्वं
आचेति किमर्थं अरिष्ट्यै रिष्टिर्येरान् तदुपशमाय रिष्टिरिति रिषहिंसायामित्यस्य सुश्रवसं मा कु
धातोः क्ति निरूपं न रिष्टिः अरिष्टिः अग्ने सुश्रवं इदि हे अग्ने सुश्रवः सुष्ठुश्रवनामय रु
स्यासौ सुश्रवाः तादृशं मां सुश्रवसं श्रोत्रेन करणेंद्रियं कुरु वेदाध्ययनार्थमा
मविकलेंद्रियं कुर्वित्यर्थः एवं हे अग्ने यथा त्वं सुश्रवः सुश्रवा असि सुश्रवे अक्ष
रादौ सुश्रवाः श्रोत्रेन करणोसि एवं तथा मां सुश्रवः सोश्रवसं श्रवेयशासि सौ सु ६१
श्रवसं श्रोत्रेन श्रवणजनितशालिनं कुरु तथा हे अग्ने त्वं यथा देवानां यज्ञस्य निधिपा
असि देवानामिंद्रादीनां यज्ञस्य यज्ञसंबंधेन निधिपा निधिरक्षकोसि तांडागारि

कोसवसि एवमहमनुष्याणां वेदस्यनिधयोत्त्यासं वेदस्य तांडागारिकोसवामीत्यर्थः

ये अग्नेसमिधमाहार्षमिति हे अग्ने अग्नयेसमिधं आहार्षं आहृतवान स्मिकस्मै जात

अहंगुरवेरा वेदसे अग्नये तु स्पमेवेत्यर्थः किंस्तताय बृहदेसेजाज्वल्यमानायेत्यर्थः हे अग्ने यथात्वंस

कटिङ्गः आ मिधा समिध्यसे नघारितया अनया समिधा ज्वलसि एवमहं समिधे सप्रकाशाको

सानिभवामि भवामि कैः आयुषा जीवनेन मेधया बुध्या वर्चसा तेजसा प्रजया संतत्या पशुभिर्गवा

पुष्टिनाधा दिभिः ब्रह्मवर्चसेन ब्रह्मतेजसा किंच ममाचार्योजीवपुत्रंमेधावीभवत्विति शेषः

प्रयोगः निराकरणा कारी अनिराकरिष्णुर्नित्संयोगकारी भवामीत्यर्थः किंचाहं आयुष्मान् यशस्वी ब्रह्मव

र्चस्वी वेदाध्ययनऋद्धिमान् अन्नादो त्वयासं कदाचिदपि ममांगविछेदो मा भवत्वि

त्यर्थः अनया कामनया अग्नये स्वाहा सुकृतमस्तु तनूपा अग्नेसि हे अग्ने तनूपा अ

सि तनूं शरीरं तस्य पालयिता असि अतो मे तन्वं शरीरं पाहि रक्ष आयुर्दा असि आयु

ग्ने ×तनूं मे पाहि २

तन्वाः शरीरस्य मे ... पूरय ... तन्वा मे

मेदेहि हे अग्ने आयुर्दा असि आयुः प्रदोसि अतः आयुर्मे देहि एवं वर्चोदा असि वर्चो मे देहि वर्चः तेजः अग्ने यन्मे तन्वा ऊनं तन्मे आपृण हे अग्ने तनु शब्दस्य द्वितीये कवचने श यङ उवङ प्रकरणे तन्वादीनामुपसंख्यानमिति पणादेशः मेधां मे ॥ अश्विनौ कुमारौ देवौ मे मम मेधा आधत्तां मे मम अंगानि शरीरावयवा आप्यायंतां स्फीतानि सन्तु न केवलं मेधादिकं किंतु एतदपि लब्धिरिति वाक्यार्थः वाक्कमप्याय ताभिस्यादिनि गदव्याख्यातं इत्युपनयनमंत्रव्याख्यानं अथ समावर्त्तनमंत्रव्याख्या येश्वंतरग्न यप्रवि अप्सु जलेषु तन्मध्ये ये अग्नयः प्रविष्टास्तानहं विजहामि त्यजामि के ते गोत्यः उपगोत्यः मयूषः मनोदा खलः विरजस्तनूदूषुः इंद्रियहं इत्यष्टौ अग्निनामानि एवं वाय यः स्वनामत एव दोषावहत्वेन प्रतीयंते अत एवान्विहाय इह जले यो निरोचननामा क त्याणनामा तं गृह्णामि स्नानार्थं जले गोत्यादीनग्नीन् सदोषवहान् त्यक्त्वा कल्याणप्रकाश गृह्णाति उपगोत्यो मयूखो मनोहा खलो विरुजस्तनूदुषुरिंद्रियहा तान्वि जहामि यो रोचनस्तमिह गृह्णामि ॥

किं भूतौ पुरु / रस्रजौ पुष्कर / पद्मं तन्मयी / माला ययोः / तौ पुष्करस्रजौ / रार्थः प्रार्थ / नाः अग्न्या व / वदो दृष्ट्वा ॥ / ॥ अग्नि / मंत्र ... / ता ४ ॥

देवः सविता / आदधातु ४ / मेधां देवी / सरस्वती आ / दधातु ४ / ... / तेऽ मेधां / अश्विनौ / देवा ... / ता पुष्करस्र / जौ ॥२

मंत्रोऽयं चाभिषेके ... ब्रह्मवर्द्धनाय ॥ १

येनावमृष्टान्तौ सुरौ प्रेतांद्वा वंभ्यषिंचतां यद्वानदक्षि नायप्राः ॥ २

काम्यसहितं जलं दृष्टकामी इति वाक्यार्थः तेनेत्यस्य तेन जलेन अहं मामात्मानं अभिषिंचामि
किमर्थं श्रियै लक्ष्मीलाभाय यशसे यशोलाभाय ब्रह्मणे ब्रह्मज्ञानलाभाय ब्रह्मवर्चसा
य ब्रह्मतेजोलाभाय येन स्त्रियमकृणुतां तेनेति मंत्रपूर्वं सं वर्त्तते तेन केन देवौ अश्विना येन
अश्विनौ सविंतौ येन जलेन स्त्रियमकृणुतं लक्ष्मीकृतवंतौ तथा येन सुरां सुराजातदो
षं अवमृष्टतां मार्जितवंतौ येनाक्षौ अभ्यषिंचतां मक्षिणी अभिषिक्तवंतौ तथा वायु
वयोर्यज्जलं यशः यशोहेतुः तत् यशोहेतु मे मामप्यस्मिन् ... ध्यादार्थं उद्यन्निति
स्नानप्रकरणे व्याख्यातं उद्यन्निति इंद्र आदित्यः उद्यन् उदयं कुर्वन् अस्मास्थितो
भवत् किंभूतः भ्राजभृष्णुः भ्राजं रश्मिं बिभर्ति इति भ्राजस्नुः प्रातः प्रमुखे मरुद्भि
र्देवैः सहास्मान् स्थितो भवत् किंभूतैः देवैः यावद्भिः यावंतो देवास्तैः सह स्थितो
भवदित्यर्थः ततः हे आविदन् सर्वजनं आदित्यत्वं दशामनि रसि बकुधनो सि अतः

ष मामां दग्धसर्निंबकुधनं कुरु किंच मा मां ब्रह्मचर्यादुत्तीर्णं आगमय जानीहि द्वितीय
तृतीययोर्दिवायावसिः सायं यावन्निरितिप्रत्यग्निः सहस्रयानिशि सैतावन्मंत्रे विशे
षः तत्र दिवा सायमिति च प्रसिद्धार्थे उतसहस्रयाष्टो बहुकाल वाची नावेव अन्यत्
सर्वं समानं एवमादि संस्कृत्वा हे आदित्य मां बहुधनं कुरु ब्रह्मचर्यादुत्तीर्यं जानीही
तियांचा वाक्यार्थः अत्र यावन्निरित्यत्र वर्णलोपः छांदसः आगमय इति कर्वाविदं
त्रि त्यत्र स्थितेन व्यवहितेनात्र संबंधः अनुद्याय वाथ देवनस्पते वृहद्वंमृदय स्वप्रसिद्धो
त्व यं वनस्पतिं अर्थात् सोमः चंद्रमा आगमत् आगतवान् किंतत् सेमः राजाव
नस्पतीनां प्रभुः वनस्पतिसावाणितियाज्ञवत् मे मम मुखं प्रामार्ज्यते सोधयिष्यति के ९२
नयत्रासावकीर्त्या सगेनसौसाग्येन च किमर्थं अनुद्याय अन्नंवनत् आद्यं चेति
तेन आद्यं तं मृदधमिति ऊहवितर्के विश्वोन्यसिद्धरर्थः एकवचने बहुवचनं॥

म मंत्र ३१ हद्धं सो मोरा जा भौ गमत् । समेमुखं प्रमार्ज्यते यशसा
च नोनच ॥५

प्रमार्ज्यनइति मृत्तुविसृज्योऽस्यलिडिःप्राणापानाविति मन्त्रार्थः पितरःशुन्धध्वं दे
पितरःशुधध्वं शोधयतः मामितिशेषः सुचक्षो[illegible] अहं अक्षिभ्यां सुचक्षाः सोत्तनह
हिं[illegible]यासं सुवर्चाः मुखेन सुवर्चा ओत्तनदीप्तिः श्रुश्रुत्कर्णाभ्यां ओत्तनश्रोवीय
ञ्सामाद्यावापृथिवीति द्यावापृथिवी आकाशपृथिव्यौ मामां[illegible]दयेतां किंच
यज्ञाः तगच्छमां आविदन् प्राप्नोतु सगः सोत्तागंधं किंचयज्ञाः मांप्रति पद्यन्तां
आगच्छतु पुनः पुनरत्तिधानमादरात्तिधानेन अत्रानेन वेष्ठनेनएतानि मम
संवितिवाक्यार्थः याहिरण्मयदग्नि[illegible] याःपुष्पस्रजः यमदग्निः ऋषिः आहरत्
आकृतवान् किमर्थं [illegible]कार्थं एवमेतिनिश्चयः कामाय अभिलाषितसिद्ध्यर्थं।
इंद्रियायचक्षुरादिप्राप्त्यर्थं ताःपुष्पस्रजः अहं प्रतिगृह्णामि किमर्थं यशसाय यशसेत
गेनचत्तगायत्तथाचैनेन पुष्पेण तत्सर्वं ममभवत्विति वाक्यार्थः याहरजमदग्नि
[illegible]

× स्प्रकार स्विपुलं पृथुं ॥ तेन संग्रथिताः सुमनसं स्त्राव ध्नामि श्रेष्ठां मयि ४

शिति याः पुष्पस्तनः यमदग्निऋषिः आदन् आदत्तवान् किमर्थं श्रद्धायै श्रद्धार्थं एव
मेति निश्चयः कामाय अभिलाषितसिध्यर्थं इंद्रियाय चक्षुरादिसामर्थ्यताः पुष्पस्र
जः अदं प्रतिमुञ्चामि किमर्थं यशसाय यशसे तेन गेन्धर्वेन गायत्यर्चनेन पुष्पस्र
र्जं मम नवात्विति वाक्यार्थः यद्यासौ अप्सरसं विंद्र इंद्रं अप्सरसामुर्वशी प्रवर्त्तती यत्र
यशाश्वकार रूपवत्त्वे ति शेषः किं स्वतं यशाः विपुलं विस्तीर्णं पृथु बक्कतरं तेन
यशसा संग्रथिताः सम्यग्रथिताः सुमनसः पुष्पाणि मयि आवध्नामि किमर्थं यशः
यशसे तथा चान्येन यशसा सूत्रस्थानीयेन संग्रंथितानि पुष्पाणि आत्मानि आब
ध्नामि तेन तादृग्यशो मम नवत्विति वाक्यार्थः यश इति चतुर्थ्यर्थे प्रथमा युवा सु ९४
युवा · वाससाः परीयः सुवासाः सा परीतो नवस्त्रधारी विपरीतः तेन वस्त्रेण परिवेष्टित
र्ग आगात् आगतवान् स श्रेयान् नवति सुजायमानः सजातः नान्य इत्यर्थः
परिवीतं आगा [illegible]
कवयं उन्नयं [illegible] मनसा [illegible]

कनीनकस्यदु
हा असि वद्वर्मे
दे हे ।५

तंयुवानंधीरासः धीराः उन्नयंति उत्कर्षयंति धीराः किंभूताः कवयः कीर्त्तिक्षा
रः पुनः किंभूताः स्वाध्यः सुष्ठु आदिता धीर्येषां ते स्वाध्यः पुनः किंभूता मनसा हृदये
न देवयंतः स्तवंतः अलंकरणमिति हे कर्णकुंडल अलंकरणमसि प्रसाधनं भ
वसीति तव स्वभावः अतः भूयः उभरो चरं अलंकारणं मम करणं भूषणं त्वया त
त्वयास्तव हवस्यासि इति हे कुजन हवस्य वृत्रनाम्नः शक्तिशालिनोसुरस्य कनी
नकः कनीनिका अक्षितारिका असि भवसि अतस्त्वां जनेन मम चक्षुः कात्रो
न वालितियांचा वाक्यार्थः रोचिष्णुरसि हे दर्प्पण रोचिष्णुरसि प्रकाशनशीलोसि
अतो मामपि प्रकाशयेत्यभिप्रायः हवस्पते छंदिरसीति हे छत्र त्वं हवस्पते दे
वाचार्य्यस्य छदिः अपवारणमसि भवसि अतः मा पाप्मनः पायात् अंसर्धेदि
आत् तत्कुरु यथा मे पापसंबंधेन भवति तथा कुर्वीत्यर्थः न केवलं पापात् अपितु

पाप्मनो माम
तद्धिहि तेजसो
पाप्मनो माम
तद्धिहि ३४

तजस्य द्युत्यर्थ
भूत स्वच चक्षुर्
असि व दृदीप
काम ए सिाव
स्मान्म पाव
छतो दैदिहि त्व
पव कारण ।

~ वृत्र स्यात्तिता रिवात्प न त्वमसि
~ अतो यथा वहनें त्वमिदि ।

८

तेजसः आदित्यतापादिरूपात्मामां अंतर्देहिकिमर्थंयशासेयशोर्थंतथाचदेहत्रयत
स्वंद्रष्टस्यतेरपिपापसंतापादिवारकोसिअतस्तेस्यःपिधाययशस्विनंमाकुर्वितस्माश
सावाक्यार्थः यशाइतिचतुर्थ्यर्थेषष्ठी प्रतिष्ठेभ्योविश्वतोमांपातुं देवयानद्योकाष्ठया
टकेवांप्रतिष्ठेभ्यःउपक्रांतानुतिक्रियैयात्रमागंप्रतिष्ठातंनिमित्वात्युवामेवप्रतिष्ठे
वे भ्यःस्वथःअतंमामोविश्वतःसंस्मात्गतिविरोधिनःकंटकादेःपातंरक्षतंतथाचय
तंयुवांप्रतिष्ठेभ्यःअतस्तस्यसादात्ममकुत्रापिगतिप्रतिबंधोमास्त्वितिवाक्यार्थःवि
छाम्य स्पदिपा श्वास्योभगिनी देवैएवदंडमामांपरिपाहिसर्वतोभावेनरक्षांकुतः ना[illegible]स्यः नाशका १५५
हि सर्वतः ॥४ रिणीभ्यःराक्षसंपंसर्पश्रृगालादिभ्यःइत्यर्थः सर्वतःसर्वासुदिक्षुः इतिश्रीउत्तुप्र
विपाम्य ॥ मिश्रकृतायांमंत्रार्थदीपिकायामुपनयनमंत्रमाख्यानं अथप्रतिष्ठामंत्रो ए
सर्वाम्यः x २ तत्रेरित हेसवितः देवदानादिगुणयुक्तः एतत्यज्ञेतेलदीयंप्राकुः किंचदृढ

स्पतिये ब्रह्मणे बृहस्पतये बृहस्पति निमित्तं बृहस्पतये किंभूताय ब्रह्मणो देवानां स
र्वकर्माधिष्ठात्रे मानुषोपि तदधिष्ठित एव कर्मणि ब्रह्मा भवति तेन हेतुना हे सवितः य
ज्ञं अवरक्ष तेन यज्ञपतिं यजमानं अव तेन मां ऋत्विजं अव तथा त्वदीयो यज्ञः ते
न मां ऋत्विजं अव तथा त्वदीयो यज्ञः तेन यज्ञं यज्ञसाधनं रक्षेति वाक्यार्थः अयं मं
त्रः कुत्रचिद्देवप्रसिद्धः मनोजूतिरिति मनः आज्यस्य जुषतां सेवतां प्रसनः किंभू
तं जूतिः जवशालिः अतीतानागतावर्त्तमानेषु गंर्त्त किंच बृहस्पतिः सुराचार्यः
इमं यज्ञं तनोतु विस्तारयतु स एव इमं यज्ञं अरिष्टं हत्वा अरिष्टं कृत्वा संदधा [illegible]
तु रिषति हिंसाकर्मा न रिष्टं अरिष्टं किंच विश्वे देवासः विश्वेदेवाः सर्वे देवा इह
यज्ञे मादयंतां दर्पं कुर्वंतु स्वार्थिको णिच् ॐ प्रति अवने धामाजोतेर्वा तथा बृहस्पता
वाप्यासँचद्द प्रतिष्ठा प्रकरणे तिष्ठ अथ बर्हिर्होममंत्रः देवा गातुविद इति अ
ति

उ

स्या पूर्वार्द्धेन देवता विसृजति हे देवाः गातुविदः यज्ञविदः गातुरिति यज्ञनामधेयी
नं गातुं यज्ञं वित्वा विदित्वा गातुं अर्थात् अयेतनेऽइतमागच्छत तथा च यज्ञपरंपरायु
अविछिन्नागमना स्वत यूयमित्यर्थः एवं देवान् विसृज्य इदानीं चमसमेंदा होमन ३
सस्पते चंद्रमः देव इमं यज्ञं वाते वायौ अधांधारयाः वाते हि यज्ञो वतिष्ठते तथा च श्रु
तिः वायुर्वा अग्निं स्मात् देवार्दुः कर्म करोत्येव तमे वाप्ये स्वस्ति कल्याणं दधात्वेति सीर
अथ स्वस्त्ययनमंत्राः स्वस्तिन इति इंद्रः नः अस्माकं स्वस्ति कल्याणं दधातु पूषा
सूर्यः नः स्वस्ति दधातु इंद्रः किंभूतः वृद्धश्रवाः बद्धधनः अवशोषधनवचनः म शिवः
हान् राशिर्वा वृद्धश्रवा नीका पूषा किंभूतः विश्ववेदाः सर्वधनः सर्वज्ञश्च तार्क्ष्यो गरुडः नः ९६
स्वस्ति दधातु तार्क्ष्यः किंभूतः अरिष्टनेमिः अनुपहतायुधः बृहस्पतिश्च नः स्वस्ति द
धातु अस्मभ्यं प्रा मरुतः इति इत्थंभूतां मरुतः अवसा अन्नेन हविर्लक्षणेना भूताः सं

मेहतमं...

तः इह नं अस्मान् आगमन् आगच्छंतु किंभूतां मरुतः पृषदश्वाः पृषतो बिंदुमिश्रा अश्वा

येषां ते पुनः किंभूताः शुभंयावानः शुभं कर्तुं जनान् येषां ते शुभंयावानः पुनः किं

भूताः विदथेषु यज्ञेषु जग्मयः गमनशीलाः अग्निजिह्वाः कृतलोकारः चतुर्दश

मनवः ते च इह आगमन् ये च सूरचक्षसः आदित्यदर्शनाः विश्वे देवाः ते च इह आग

मन् भद्रं कर्णेभिरिति हे देवाः कर्णेभिः कर्णैः भद्रमनुकूलं शृणुयामः चक्षुभिः

अक्षिभ्यां भद्रं पश्येम देवाः किंभूताः यजत्राः यजनशीलाः यज्ञं त्रायंत इति वा।

किंच स्थिरैः अंगैः दृढैः शरीरावयवैः तुष्टुवांसः स्तुवंतः अर्थात् भवतः देवहि

तं यदायुः तत् व्यशेम व्यशेमहि देवेभ्यः हितं स्थापितं शतवर्षात्मकमित्यर्थः श

तमिन्नु हे देवाः शरदंशमपि अर्थात् आयुः अंति अंतिके स्वल्पकालमित्यति

प्रायः यत्र एवमतो ब्रूमः नः अस्माकं आयुर्मध्ये मा रीरिषत मा हिंसिषुः

×नास्माकं तन्वन्ता जरसे जरां चक्रे। तत्तवंतः जरान्ति मात्त मशक्तिमपि कृतवंतः अर्थः भवंत एव
×किं च पत्रपारदः प्राते ॥ ~ ॥

८९ किंच गंतोर्गंतुमा भवतीत्यर्थो ह्यार्य्य" अकाल एवमागच्छतीत्यर्थः यत्र शरदां अंते पुत्रा
सः पुत्राः पितरो भवंति पुत्रा अस्मयस्ते यजमानजनिता भवंति दितिकारिणश्च भवं
ति अथवा पुत्रा एव पितृणां मौर्ध्वदेहिकं कुर्वाणाः पितरो भवंति पोषकत्वात् पितरः २
संपद्यते अथवा जीवदवस्थायामेव पोषकत्वात्पितर इव भवंति तथा च यस्या
×भवति× मवस्थायामेवमस्मान् इवं सामध्ये एव मा रिरिषतेत्यभिप्रायः यदुक्तं संचिंत्य संचिंत्यतमु
ग्रदंडं स्पृष्टं सुमनुष्यस्य क्षिवृत्ताणोस्य वर्षासु संसिक्ता इव चर्मबधाः सर्वे प्रयत्नाः
१७ शिथिला भवंति अदितिर्द्यौरदितिः द्यौः स्वर्गः अदितिस्तु न विद्यते दितिः खंडनं शिवः
यस्याः सा अदितिः अविघ्नकारिणी भवतीत्यर्थः एवं सर्वत्रान्वयः पंचजनः कुबेरः ७१
जनित्वं जनिष्यमाणं अपो अघा वदंतु देश्रमेयत् अपः अद्य अन्वचारिषं अनुचरि
तवान स्मि अवसृष्टा आदादित्यर्थः यद्वा जलस्य रसेन वयं समसृष्टास्मा हि संसृष्टाः

स्यच्चपयस्वान् पयोयुक्तः सन् अत्रादमागममागतवानस्मि अतस्तं मामां व
र्चसा तेजसा संसृज संयुक्तं कुरु वर्जयाऽऽवत्रादिनाधनेनघा ॥ द्यौः शांतिरंतरिक्षं
शांतिरापः शांतिरोषधयः शांतिर्वनस्पतयः शांतिर्विश्वेदेवाः शांतिर्ब्रह्म शांतिः स
र्वं शांतिर्देवाः ... सामाशांतिरेधि अस्तु शांतिर्भवतु द्यौरित्यादिषु सर्वत्र विभक्ति
व्यत्ययः तथा च या दिवि शांतिर्या अंतरिक्षे शांतिः शांतिरेव या शांतिः सा मा मां प्रति
एधि भवतु ॥ अथ नवर्चमंत्रव्याख्यानं आकृष्णेनेति देवपूजायां व्याख्यातं ॥ इ
मं देवा असपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेंद्रस्येंद्रि
य याय इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा ॥
हे देवाः इमं राजानं असपत्नं शत्रुरहितं सुवध्वं जनयत कुरुत एवं च महते क्षत्राय
वीर्याय महते ज्यैष्ठाय ज्यैष्ठत्वाय महते जानराज्याय जनसंबंधिराज्याय इंद्रस्य इंद्रि

२- यस्यइंद्रियायवीर्यायसुवध्वमितिसर्वत्रान्वेति इमंकं इमं अमुष्यपुत्रंअर्थात्अस्यय
जमानपितुः अमुष्यै अमुष्याश्चयजमानमातुः पुत्रमिमंयजमानंअसपत्नंत्वा
दिकरत्वहेतुमाह वःयुष्माकंविशेविशः जनपदजातेःएषराजाअस्माकंब्राह्मणा
नांपुनः असौ अमीसोमोराजा यद्वा हेकुरवः कुरुदेशीयाः वःयुष्माकंविशोविशः
जनपदस्यएवराजा अस्माकंपुनः ब्राह्मणानांअमीसोमोराजातस्मादिवदर्थंप्रार्थनाक्रि
यतेनतुस्वार्थमित्यभिप्रायः अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं अपांरेता
ंसिजिन्वति अग्निःस्तूयते योऽयमग्निर्दिवःमूर्धाआदित्यात्मनाद्युलोकस्यमूर्धा शिवः
अय वर्तिःककुत्श्रेष्ठमहान्ककुद्वितिमहन्नामसुपठितंअंतलोपेकृतेएतद्रूपं अयमे ९८
वमहानात्माजगतःसमर्थः अयमेवाग्निःपृथिव्याःपतिरीश्वरःतापमा कृषकाद्य
कादिभिः सर्वाःप्रजाःअनुगृह्णातीत्यभिप्रायः किंच अयमेवअपांरेतांसिजिन्वति

[illegible]

जिव्वतिं प्रीतिकर्मा उष्यतीत्यभिप्रायः प्रवृत्तिपरिण[illegible]ता दृष्टिं जनयतीति दर्शितं य
द्वा अयमिति ऊर्जस्यते ऊर्जोपि दिवो मूर्द्धेत्यर्थः तेन ऊर्जप्रकाशकत्वात् मंत्रस्य संभव
ति उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते संसृजेथामयं च अस्मिन्सधस्थे अध्युत्त
रस्मिन् विश्वे देवा यजमानश्च सीदत हे अग्ने उद्बुध्यस्व उद्बुध्यो भव स्वप्रकाशो भवति ३
जागृहि त्वं जागरणशीलस्त्वं भव अतः इष्टापूर्त्ते संसृजेथां अर्थात् यजमानेन सह अयं
च अयं यजमानोपि इष्टापूर्त्तेनास्यां संसृष्टो भवतीति शेषः इष्टं यागादि पूर्त्तं तडागादि य
द्वा अयं बुधः तथा च अयं बुधोप्युद्बुद्धो भवत्वित्यर्थः तेन बुधप्रकाशकत्वात् मंत्रस्य सं स्य
भवति ततस्तस्मिन्सधस्थे सहस्थाने आदित्यलोके किं च ते अध्युत्तरास्मिन् स्वर्गे
लोके बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋत
प्रजात तदस्मासु द्रविणं धेहि चित्रं हे बृहस्पते ऋते प्रजात ऋतात्सत्यात् प्रजातः इति
य

ऋतंप्रजातः तत्द्रविणं अस्मासु धेहि द्रविणं किंभूतं चित्रं नानाविधं तत् किं यत्
अतिशाये न अर्यः ईश्वरः अर्हात् पूजयेत् यद्द्युमत् विभाति शोभते यत् ज
नेषु क्रतुवत् यज्ञवत् अतीष्टजनकत्वेन विभाति यच्छवसा वसंश्रवणा बलेन दीद
यत् दीप्यते यस्मरक्षिता रोरुवं नीसतिशाय्यः ॥ अन्नात्परिस्रुतो रसं ब्रह्मणा व्य
पिबत्क्षत्रं पयः सोमं प्रजापतिः ऋतेन सत्यमिंद्रियं विपानं शुक्रमंधस इंद्र
स्येंद्रियमिदं पयोऽमृतं मधु ॥ प्रजापतिः प्रथमशरीरी अन्नात् हविर्लक्षणात् अ
न्नस्य हविर्लक्षणस्य रसं परिस्रुतः स्वधीयाश्च रसं ब्रह्मणा त्रयीलक्षणेन व्यपिबत् न
३८ पयः सोमं च व्यपिबत् क्षत्रं च पिबत् अन्नपानं वशीकरणं सर्वमेतत् सत्यमने
न च ऋतेन तस्य संजातं यत्सोमं इंद्रियं वीर्यं संजातं किंभूतं वीर्यं विपानं पानयो
ग्यं एवं च अंधसः शुक्रं रेतो लिनं अन्नात्संभूतमित्यर्थः अथवा इदं पयः इंद्र

शिवः
११
लो दै ना रा वि
लो पत्

स्प इन्द्रियं अमृतं मधु चक्षवातु शन्नोदेवीरिति आह्ने व्याख्यातं कयानश्चित्र आ
भुवदूती सदावृधः सखा कया शचिष्ठया वृता चित्र आपनीय इन्द्रः कया ऊत्या
केन तर्पणेन नः अस्माकं सदावृधः सदाकालं वर्द्धयिता सखा च भुवत् भूयात् अभि
वृद्धिसाकारो ग्रे वृता महसं ध्यते कया च आवृता कर्मणा सदावृधः सखा च भूयात्
आवृता किंभूत या शचिष्ठया शचीति कर्मनाम । अतिशयित कर्मवत्या ॥ केतुं कृ
ण्वन्न केतवे पेशो मर्या अपेशसे समुषद्भिर जायथाः ॥ हे केतो अज्ञानाय केतुं ज्ञा अकेतवे
नं कृण्वन् कुर्वन् नविद्यते केतुर्ज्ञानं यस्य सः अकेतुः अपेशसे अरूपाय मर्या मार्या
य मनुष्याय पेशः रूपं कृण्वन् एवं गुप्तशरीरः सन् उषद्भि उषोभिः समजायथाः सद्
जातो भवसि ॥ इति नवग्रहमंत्र व्याख्या ॥ अथाधिदेवतानां त्र्यंबकं यजामहे इ
ति श्रीश्च ते इति व्याख्यातं यदक्रंदः हे अर्वन् अश्व ते तव महिमन् उपस्तुसंस्तव

व ह

॰२ देतुः तस्माज्जातं काविवश्येनस्यपक्षौ इवालुसोपमम् मेते हरिणं वाहू वाहू इवयत्र
वाहू शब्देनाग्रचरणद्वयमुच्यते तथाच यथापक्षौ स्यांश्येनः प्रशंसनीय प्रेशस्तंग
च्छति तेन तौ तस्यस्कन्ति देत्र एवंहरिणोपिबाहू स्यांशीघ्रंगच्छति तेन तौ तस्यस्कन्ति
देत्र नथांचापितत्किंयत् प्रथमंजायमानः सन् अक्रंदः शब्दमकरोः अश्वमेधैक
मेणिसाधकत्वेन विशिष्टसाधनमहमिमेवं प्रकारेण किं कुर्वन् समुद्रा दुद्यन् उत्तिष्ठ
पुरीषा॰ न् उतवापुरीषात्जलात् विष्णोरराट्मसिमाख्यातं आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी
आजायतां राष्ट्रे राजन्यः शूर इषव्योति व्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानां
शुः सप्तिः पुरंधिर्योषा जिष्णू रथेष्ठा सभेयो युवास्य यजमानस्य वीरो जायतां निकामे नि शिवः १००
कामेनः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तामिति योगः क्षेमनः कल्पतामिति ॥
(योगक्षेमा वै तत्र कल्पते यत्रैतेन यज्ञेन यजते त्क्षमः प्रजानां योगक्षेमो नवह्निः) दे
ऊ

ब्रह्मन् अस्मन: अस्माकं राष्ट्रे देशे ब्राह्मण: ब्रह्मवर्चसी आ जायतां ब्रह्मवर्चसं वेदस्तदस्या
+ ब्रह्मवर्चसी + स्तीति वेदवानित्यर्थः आ जायतामिति आ ब्रह्मन्नित्यत्र त्यनेनाङा संबध्यते वेदसाध्या:
+ वेदिन सर्वा: क्रिया: इति प्रथमं संवा शास्यते किंच राजन्य: क्षत्रिय: शूर: आ जायतां रथेनैके + एकश्च एव
नय: शत्रून् सादकारो व्रजत्यत्र महारथ: स विज्ञो युद्धशास्त्रविशारद इत्यादि प्रति + कुशल: अति
+ दुग्धवती + पादित: किंच धेनुर्गौर्दोग्ध्री आ जायतां किंच अनड्वान् वृषभ: वोढा शकटादुद्वा काधी शत्रूणां साधनशील:
हक: आ जायतां किंच सप्ति: अश्व: शीघ्रश्च आ जायतां योषा स्त्री पुरंधि: उत्कृष्टरू महारथ इति ज्ञाप नो महारथ: ५
पवती आ जायतां वीर: युद्धवीर: दानवीरो दयावीरश्च अस्य यजमानस्य रा इति
सर्वत्रान्वेति किंच न: अस्य यजमानस्य निकामे निकामे देशे देशे पर्जन्य: मेघ: अभि
मरु: वर्षतु ओषधय: फलवत्य: पच्यंतां किंच योग: क्षेमश्च कल्पतां कल्याणतां व्रजतु
अ. अलब्धलाभो योग: लब्धपरिपालनं क्षेम: स यो भाव इदं गणो मरुद्भि: हे इंद्र यस्य

सयोषाः समानपात्रलोजनः अर्थात् हे तावविष्टशत्रून् अप्रियमो अस्मादेव अर्वन् अ
प्रियमोसि आदित्योसि त्रितोसि त्रिस्थानः इंद्रश्च त्वमसि केन निमित्तेन गुह्येन व्रतेन
प्रकृष्टेन कर्मणा यज्ञेनेत्यावत् किंच त्वं सोमेन सह समयाम मध्येन विष्टकम्यति त्व
न्नः सोमांग संलिप्त इत्यर्थः तथा च ते तव दिवि स्वर्गे त्रीणि बंधनानि ऋग्यजुःसामा
त्मकत्रयीलक्षणानि अङ्गं वेदंति ब्रह्मवादिन इति शेषः एवमश्वः स्तूयते कार्विर
सीति कालीस्नानप्रकरणे व्याख्यातं चित्रावसो स्वस्ति ते पारमशीय रात्रिर्वै चि
त्रावसुरिति श्रुतेः हे चित्रावसो रात्रे मम स्वस्ति अस्तु अलमस्क स्वस्त्यावते पारं अशी शिवः
य प्राप्नुयां चित्रावसुशब्देन रात्रिरुच्यते अथ ... भगानां अग्निरूत मितिव्या १०१
ख्यातं अस्वंतर मृतं अश्वान निषिंचति अप्स्वन्तः अमृतं अवस्थितं वर्त्तते अप्सु भेष
जं अवस्थितं वर्त्तते हे अश्वाः ते यूयं वाजिनः अन्नवंतः भवत वाजमन्नं उपजीवते

न

अपांप्रशस्तिषुलोकेषुप्रशस्तेष्वपिस्तवत् किंचदेदेवीः आपःदेव्यः आपंपोवा
ऊर्मिः कल्लोलः तेनायमश्वः वाजमर्न्नसेत् सनुयात् संलजेत् यद्वा सिनुयात् वध्नी
यात् सिनोतेः सनोतेर्वा एतद्रूपं लिङि कल्लोलः किंभूतः प्रवृत्तिः प्रकर्षेण त्वरण
शीलः ककुद्मान् ककुतः ककुतो वृषभस्कंधप्रदेशः ककुद्शब्देनोच्यते तत्तुल्यत्वात्
ककुद्शब्देनोन्नतमुच्यते बकासिरुद्कैः कृतइत्यर्थः वाजसा वाजसंलक्षः वाज
हेट्वधिवि६ मर्न्नं स्योनापृथिविनः अस्माकं स्योना सुखरूपा त्वं अनृक्षरा त्वं साधुवस्थि
तिर्भवेत्यर्थः नविद्यते नृक्षरो यस्यां सा अनृक्षरा नृक्षरः कंटकः निवेशिनी च त्वं
साधुवस्थितिर्भवेत्यर्थः यच्छानः शर्म सप्रथाः नः अस्माकं शर्म यच्छ शर्म शरणं
सुखं किंभूतः सप्रथाः सर्वतः पृथुः इदं विष्णुरिति श्राद्धप्रकरणे व्याख्यातं त्रातारमिं
द्रं अतः हेतो इंद्रं ह्वयामि आह्वयामि इंद्रं किंभूतं त्रातारं संरक्षितारं यतः पुनः किं

२४ अवितारं अवनकर्तारं हवे हवे आह्वाने आह्वाने सुहवं शोभनाह्वानं शूरं विक्रांतं
शक्रं पुरुहूतं पुरुशब्दो बहुवचनः सः इंद्रः नः अस्माकं स्वस्ति धातु दधातु पुनः किं
भूतः इंद्रः मघवा मघं धनं तद्वान् निपत्याव्याय वाशु देवाध्यायतः सुव्रतः अभिषे
कं कुर्वतः जनस्य पुष्टं दृंगं तासि अस्तं त्वां ब्रवीमि नियुत्वान् गणवान् भूत्वा आगहि आ
गच्छ अयं पिशंगो ग्रहः ते त्वां प्रति आयामि आ गच्छतु वचनव्यत्ययश्छांदसः तथा च
शुक्रादीनां ग्रहाणां त्वमेव स्थानमित्यभिप्रायः प्रजापते न हे प्रजापते त्वत् त्वत्तः अ
न्यः देवताविशेषः तानि विश्वा रूपाणि विश्वानि रूपाणि अर्थात् वर्तमानानि तानि तानि त्रिवः
चराचरात्मकविश्वानि परितः सर्वतो व्यावेन न बभूव त्वमेव सर्वं चराचरमयः नान्य इत्य १०२
र्थः यद्वा न बभूव विश्वानि रूपाणि कर्तुं न शक्तो न बभूव समर्थः अतः यत्कामा वयं ते
त्वां जुहुमानाः अस्माकं तदस्तु किंच तेन वयं रयीणां धनानां पतयः स्यामः स्वेमः ॥

नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु तेभ्यः सर्वेभ्यो नमस्कृते केँ ये के च न पृथिवीं अनु
पृथिव्यां ये च अंतरिक्षे ये च दिवि स्वर्गे संति तेभ्यः सर्पेभ्यः नमः आदरार्थे पुनर्ग्रहणं
ब्रह्म जज्ञानं प्रथमं ब्रह्म आदित्यरूपं प्रथमं पुरस्तात् प्राच्यां दिशि जज्ञानं विजयते
ततोनंतरं सीमंतः मर्यादातः मध्यस्थानात् रुचः सुरोचमानान् इमान् लोकान्
स्वप्रकाशेन विश्वावंसाद्वृणोति विवृतान् करोति सुबुध्न इति स एवादित्यः बुध्न्याः
उपमा दिशो व्यावृणोति बुध्नमंतरिक्षं तत्र लवानु ध्यात्रुपमीयंते आसु स्थितानि
*उच्यते भूतानीसु उपमा दिशः किं स्वतः अस्य विष्टाः अस्य जगतः विष्टा विविधं स्थानं विवि
धं तिष्ठंत्यस्यामिति विष्टाः किंच सतः विद्यमानस्य असतः अमूर्तस्य योनिः स्थानं
अमूर्तस्य प्रत्यक्षस्य वा आदेः आदित्यः किं स्वतः वेनं किंतः मेधावी वा एवं दिशः लो
कं स्वतानि वा आदित्य एवात्विन किं नान्य इति सूर्यः स्तूयते अथ लोकपालानां

१५ आतारमिंद्रमितिमाख्यातं अभिहुतमित्यपि अभिसियमइत्यपि छ्यतइत्यपि इ
मंमइत्यपि वातोवामनोवागंधर्वाः अश्वस्तुनक्किवा आप्तः समुच्चयार्थः हे अश्व
एतेत्वांसंजंतुइत्यध्याहार्यं एते के वातोवामनश्च गंधर्वाः सप्तविंशतिश्च नक्षत्रा
णीत्यर्थः त्वयिजवंचदधातु तत्र हेतुः ते अग्रे प्रथमं अश्वमयुंजन् ते अस्मिन् जवं वेगं
आदधुः आहितवंतः तथा च वातादयः एवं पूर्वमश्वमयुंजन् त एव अत्र वेगं आद
धुः अतस्त एव तत्र त्वं वंतं युंजंतु ते च त्वयि जवं आदधत्विति वाक्यार्थः ऊबिंदं गब्र
हे सोम अंगमन्त्रं ऊर्धिन् इति शेषः यथा यवमंतः गृहीतयवाः केचित् जनपदाः शिवः
यववितर्कैर्दांति लुनंति दात्रं लवने किं कृत्वा अनुपूर्वं अनुपूर्वेण वियूय पृथ १०३
कृत्य निष्पिस्येत्यर्थः एवं इह एषां यजमानानां यवइवतोजनानि लोप्यानि वस्तूनि
कृणुहि कुरु केषां ये वर्हिषो वर्हिस्थिता यजमाना युक्तिं यजंतिनमः अन्नं हवि

कृह नम

र्लक्षणं यदीत्वा तु किं यो गां स्वाहादिकं विधाय यजंति यागं कुर्वंति तमीशानं त
स्थातं ईशानं रुद्राधिपतिं अवसे अवनाय तर्पणाय वयं हूमहे आकार्यामः ईशा
नं किंभूतं जगतः जंगमस्य तस्थुषः स्थावरस्य च पतिं पुं॰ किं॰ धियं जिन्वं धिया बुध्या
जिन्वति प्रीणाति धियं जिन्वः यद्वा कर्मणा जिन्वति तथा कथं यथा नः अस्माकं
पूषा सूर्यः वेदसां धनानां वृधे वर्द्धनाय असत् स्यात् किंच अदब्धः अनुपहिंस्यः स
न्रक्षिता असत् तथा पायुः पालयिता च असत् स्वस्तये च असत् नमोस्त्विति व्याख्यातं
ब्रह्मज्ञानमिति च॥ विश्वकर्मन् हविषा वर्द्धनेन॥ हे विश्वकर्मन् अनेन हविषा मद्
रुचे× त्तृतीयेन वर्द्धनेन वर्द्धयित्वा इंद्रं जगतस्त्रातारं अकृणोः कृतवानसि तस्मै च वि ×अवध्यं च ह तवानसि×
शः पूर्वे विप्राः मनुष्या वशिष्ठप्रभृतयः समनमंत संनताः इदानींतना अपि किंच य
थायतः पंचम्यर्थे कारणात् अयमिंद्रः उग्रः उदीर्णवज्रः विहव्यः असत् अस्तव
वंमस्तपूर्भावापं

२८

मार्गमानिन्यः ३
गणपति दुर्गा वधू आकाशाश्वनी चेति ४

त् विविधेषु कार्येषु आहूयत इति विहव्यस्तस्मात् सवितुः सामर्थ्यात् इंद्रस्यायं प्रभा
वद्दलसिद्धायः अथ विनायकादि पंचकस्य गणानांत्वा अंबे अंबिके वालोवेति वक्ता स्वाहा ...
ऊर्ध्वा अस्य अस्य समिधेभवंति प्रजापतिः रूपस्य ऊर्ध्वादिवमास्य समिधो ... लवंति शोचींषि अर्चीं
षि ऊर्ध्वा ऊर्ध्वानि शुक्राण्यग्नानिचलवंति किंच द्युमत्त माद्युमंत निंत्रये किंस्त
स्य सुप्रतीकस्य सूनोः पुत्रस्य जातस्य सखे वमग्निं धारयति एवं स्तुतं वह्निं क्रमइति
वाक्यशेषः अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिंचामि भिषक् वैद्यस्तस्य
कर्म भैषज्यं अश्विनोः अश्विनीकुमारयोः भैषज्येन भिषक्कर्मणा त्वामभिषिंचा
मि किमर्थं बलेन तेजसे ब्रह्मवर्चसायवेराय अथचंद्रप्रकाशकः आपादस्तु
श्रु देसो नजयंत त्वां अर्थात् परस्मै अनुमदेम आहयामः त्वां कथंभूतं आपा
दं अंसने अनमसित्तं वा युत्सु युद्धेषु पृतनासु सेनासु पप्रिं यालयितारं एपा
दि

सुप्रतीकस्य
पुत्रस्वस्य
...
नस्य सूता ५

शिवः
१०५

त्नन ष्करणयोरित्यस्यैवैतद्रूपं॥ स्वर्षां स्वः स्वर्गं सनोतीति स्वः सां तं स्वर्षां अप्सां
अप्सां सनितारं हृजिनस्य बलस्य ग्रोपां गोप्तारं नरेषु ज्ञां जयतेरेतद्रूपं संग्रामे जे
तारं सुक्षितिं सुवासं सुश्रवं कल्याणकर्तृत्वेन प्रसिद्धं सोमो धेनुं॥ सोमस्तस्मै धेनुं
ददाति सोम एवार्वन्तं अश्वं ददाति आशुं शीघ्रगतिं सोम एव वीरं पुत्रं ददाति किं
भूतं पुत्रं कर्मण्यं कर्मसु साधुं सादन्यं सदने गृहे साधुं विदथ्यं यज्ञे साधुं सभेयं स
भायां साधुं पितृश्रवणं पितुरनुज्ञाशासने स्थितं विनीतं तस्मै कस्मै अस्मै सोमाय यः
यजमानः ददाशत् ददाति॥ त्वमिमा ओषधीः सोम हे सोम इमाः विश्वाः सर्वा ओ
षधीः त्वं अजनयः जनयसि त्वं उरु विस्तीर्णम् अन्तरिक्षं आ ततंथ विततवानसि त्वं ज्यो
तिषा तमः विवर्थ विवृणोषि तमस्त्वमेवावनयसि अस्पर्थः स्कृतिः॥ देवेन नो मनसा

[illegible]

१० द्वेनेति प्रैसेत द्वितलोपश्छांदसः हे देव हे सोम देवेन मनसा नः अस्माकं सहसा
वद्र सहसत्वेवत् आकारश्छांदसः रायो धनस्य अस्तिसांगं अभियुध्य निर्गमति कर्म
णां मध्ये पवाते अंतर्लोवतणप्यों गृह्यते तेन अभियुध्य अनिगमय देही मर्षः
एवं दानप्रवृत्तं त्वां मां कश्चित् आत्मवत् प्रतिबध्नीयात् तनति प्रतिबंधार्थः कृतम्
मेव मुच्यसे इति चेत् तत्र त्वं वीर्यं स्वकीयं वीरकर्मणः इशिषे ईश्वरो सि तत्र
लोकधामार्थं प्रचिकित्स आध्यपगमं कुरु गविष्टौ गोषणे नात्रैषु लोकउ शिवः
च्यते तथाच स्वर्गप[illegible]यां भूता प्रचिकित्सयार्थ्या स्वर्गपश्यामं तथा कृधि १०५
तिवाक्यार्थः

मंत्रार्थदीपिकायान
दशमो युधेमैत्र अष्टेपि वार्गास्तत्तो विषयोम

पात्रमस्मा२२